नं० ६ ८ ८ - घ

स्मृत्यर्थसारः (धर्मशास्त्रम)

१५ पत्र

नं० ६ ८ ८ - घ

पत्राणि ४६

नं० ६८८-घ
स्मृत्यर्थसारः (धर्मशास्त्रम्)
पत्राणि ४६ (अपूर्णम्)

नं० ६८८८
स्मृत्यर्कसार०
धर्मशास्त्र । अपूर्ण
[illegible]

स्मृतिसाररत्नावली

स्म॰र॰ श्रीगणेशाय नमः श्रीसरस्वत्यै नमः॥ श्रीगुरुभ्यो नमः॥ श्रीकुलदेव्यै नमः॥ गणेशं ब्रह्म विष्णीशान् वाग्लोमालोक
१ पान् ग्रहान्॥ दुर्गां मन्वादिकान् वंदे व्याख्यातॄंश्च सदा गुरून् १ श्रीकंठश्रीकराद्यैश्च श्रुतिस्मृतिपुराणगैः॥
स्मृतिशास्त्रेष्वनेकेषु विप्रकीर्णेष्वनेकधा २ अनुष्ठानोपकारार्थं स्मृतिछिद्रं प्रयत्नतः पुराणन्यायमीमांसा
सांगवेदैः प्रपूरितं ३ कामधेनौ प्रदीपे च कौमुदी कल्पवृक्षलतादिषु॥ शंभुभट्टविड्केदारलोलटाद्यैश्च भाषितं ४
मन्वाद्यनेकस्मृतिषु व्याख्यातं प्रतिपादितं॥ स्मृतिसर्वसारं वक्ष्यामि सुखानुष्ठानसिद्धये ५ प्राचीदिशात्वं स्यात्तदु
दीचीशानदिक् तथा तिष्ठन्वा पह्वतानुक्ता वासीनस्त्वेव कर्मसु ६ कर्मोद्यानामनुक्तौ तु दक्षिणांगं भवेत्तथा॥ कु
त्सिते वामहस्तस्याद् दक्षिणस्याद् गुत्सिते॥ यज्ञोपवीतिना कार्यं सर्वं कर्म च दक्षिणे ७ मनःप्रसादात्तस्योक्तानयमा
त्मानकर्मणा॥ आचम्य चात्मनः शुद्धिं कृत्वा कर्म समाचरेत्॥ कर्म यथाकृतं त्यक्त्वा तावदेव पुनश्चरेत् प्रधानस्याक्रि
यायां तु सांगं तत्क्रियते पुनः तदंगाकरणे कुर्यात् प्रायश्चित्तं न कर्तनं॥ प्रभुः प्रथमकल्पस्य योनुकल्पेन वर्तते॥ स
नाप्नोति फलं तस्य परत्रेति श्रुतिः स्मृतिः॥ कर्मणा मनसा वाचा यत्नाद्धर्मं समाचरेत॥ अस्वर्ग्यं लोकविद्विष्टं धर्ममप्याचरेन्न
तु॥ बहूल्पं वा स्वगृह्योक्तं यस्य कर्म प्रचोदितं॥ तस्य तावति शास्त्रार्थे कृते सर्वः कृतो भवेत् श्रौतेषु सर्वशास्त्रोक्तं सर्वसेव स्म॰
प्रचोदितं॥ स्मार्ते साधारणं तेषु ग्राह्यं श्रौतेषु कर्मसु तमपोवाचिका धर्मा जातिदेशकुलोद्भवाः॥ ग्रामाचाराः परिग्राह्या १

येतुविध्यविरोधिनः॥युगधर्मापरिग्राह्याःसर्वत्रैवयथोचितं॥यत्कृतेदशभिर्वर्षैस्त्रेतायांहायनेनतु॥द्वापारेतत्रमासे
नत्वहोरात्रेणतत्कलौ॥देवरेणसुतोत्पत्तिर्वानप्रस्थाश्रमोनच॥दत्तायाश्चक्षतायाश्चपुनर्दानंपरस्यचसमुद्रयात्रास्वी॥
कारःकमंडलुविधारणं॥महाप्रस्थानगमनंगोपशुश्चसुराग्रहः॥अग्निहोत्रहवण्याश्चलेहोदीक्षापरिग्रहः॥असवर्णा
सुकन्यासुविवाहाश्चद्विजातिषु॥वृत्तःस्वाध्यायसापेक्षमघसंकोचनंतथा अस्थिसंचयनादूर्ध्वमंगस्पर्शनमेवचप्रायश्चि
त्तविधानंचविप्राणामरणांतिकं॥संसर्गदोषःपापेषुमधुपर्केपशोर्वधः॥दत्तौरसेतरेषांतुपुत्रत्वेनपरिग्रहः॥सत्रदीक्षा
व्रतेस्तेयान्महापातकनिःकृतिः॥प्रतिमाभ्यर्चनार्थायसंकल्पश्चसधर्मकः॥सवर्णाम्भांगडुषाश्चसंसर्गैःशोधितैरपितृ
मित्रेचैवविप्राणांसोमविक्रयणंतथा दीर्घकालंब्रह्मचर्यंनरमेधाश्वमेधकौ॥कलौयुगेत्विमान्धर्मान्वर्ज्यानाहुर्मनीषि
णः॥विप्रक्षत्रियविट्शूद्राश्चत्वारोवर्णाः॥तत्रविप्रक्षत्रियवैश्याद्विजाद्विजाश्चतेषांमातुःप्रथमंजन्मऽपनयनाद्वितीयंज
न्म॥तृतीयंयज्ञदीक्षायांऽतमंजन्म॥स्त्रीणांविवाहउपनयनस्थाने॥द्विजानांगर्भाधानादिकाअंत्येष्टिपर्यंताक्रियामंत्रतःकार्याः
॥तत्रसंस्काराः॥गर्भाधानंपुंसवनानवलोभनसीमंतोन्नयनजातकर्मनामकरणनिक्रमणान्नप्राशनचौलोपनयनसावि
त्रीव्रतवेदव्रतारंपकव्रतसमावर्तनगोदानव्रतविवाहाःसेषापट्सावकसकाःषोडशसंस्काराः॥तत्रर्तौगर्भाधानंकार्यं॥

स्म॰सा॰ रजःप्रभृति षोडश्यारात्र्यांतं ऋतुकालः॥ गर्भचलनात्पुरा तृतीये चतुर्थमासे वा पुंसवनं कार्यं॥ अनवलोभनं चतुर्थषष्ठेष्टमे वा मासे
२ सीमंतोन्नयनं कार्यं॥ जाते पुत्रे पिता स्नात्वा रात्रौ संध्ययोर्ग्रहणे वा वृद्धिश्राद्धं कृत्वा जातकर्म स्तनादिदारितस्य प्राक् प्रजापतिश्री
सेच कुर्यात्॥ जाताशौचांतरमध्ये च कुर्यात्॥ मृताशौचमध्ये जाते तु तदा वा शौचांते वा कुर्यात्॥ नामकरणं जातकर्मानंतरं द्वादशे
न्हि वान्यस्मिन् शुभे अहनी वा कार्यं॥ निष्क्रमणं चंद्रदर्शनं सूर्यदर्शनं देवतानमस्कारं वा द्वादशेन्हि वा तृतीयमासे चतुर्थे वा कुर्या
त्॥ अन्नप्राशनं षष्ठमासेष्टमे वा दंतजाते वा कार्यं॥ चौलं प्रथमे वर्षे तृतीये वा कार्यं॥ बहुमतत्वात्॥ यथाकुलधर्मं वा एतेसं
स्का॰ए॰ बीजगर्भसमुद्भवैनोपार्थं यथाल्लाचारं कार्याः॥ स्त्रीणामहोमकाः संस्काराः विवाहः समंत्रकः॥ एते कालातिक्रमे व्याहृ
तिहोमं कृत्वा कार्याः॥ एतेषु एकैकलोपे पादकृच्छ्रं कार्यं॥ चौले त्वर्धकृच्छ्रं मत्सालोपे चानापदि चाह्नि गुण उपनयनाख्यकृच्छ्रा
उच्छिष्टाद्याव्रप्रपताना स्युः कामचारकामवादभक्ष्या स्युर्महापातकवर्जी नेषां चांडालादिस्पर्शेस्त चैलं स्नानं प्रागन्नप्राशनादस्य
स्नानं प्राक् चौलादाचमनं पश्चात्स्नानमित्येके पित्रोः स्वधानिनयनादेतेन मंत्रान्ह्यपुः॥ उपनयनं जन्मप्रभृति वा गर्भप्रभृति वा
अष्टमेब्दे एकादशे द्वादशे वा विप्रादीनां क्रमात्कार्यं गुरुशुक्रादि शुभग्रहबलालाभे सति पंचमाब्दमारभ्य षोडशाब्द द्वाविंशाब्द च राम॰
तुर्विंशाब्दांतं वा विप्रादीनां क्रमात्कार्यं अतऊर्ध्वं सावित्रीपतिता व्रात्याः स्युः तेषामचीर्णप्रायश्चित्तानामुपनयनाध्यापनया २

पनविवाहादिकं न कार्यं व्रात्यानां गृह्यप्राप्याश्रितं वक्ष्यते ॥ षंढांधबधिरस्तब्धजडगद्गदपंगुषु कुब्जवामनरोगार्तशुष्कां
गी विकलांगिषु मत्तोन्मत्तेषु मूकेषु शयनस्थे निरिंद्रिये ध्वस्तपुंस्त्वेपि चैतेषु संस्कारास्युर्यथोचितं ॥ मत्तोन्मत्तौ न सं॥
स्कार्यौ वित्स्ये के कर्मस्वनधिकारतः पातित्यं नास्ति तदपत्यं संस्कार्यं ब्राह्मण्यां ब्राह्मणेनोत्पन्नो ब्राह्मण एवेति श्रुतेः अने
संस्कार्यादृत्याहुः ॥ होमं तावदाचार्यः कुर्वीत उपनयनविधिना आचार्यसमीपे नयनं चाग्नेः समीपे नयनं सावित्रीवाचं
न वा अन्यदंगं यथाशक्ति कार्यं विवाहश्च कन्यास्विकारे न्यदंगं ॥ औरसक्षेत्रजाश्चैषां संस्कार्या भागहारिणः ॥ औरसः पु
त्रिकापुत्रः क्षेत्रजो गूढजस्तथा ॥ कानीनश्च पुनर्भूजो दत्तः क्रीतश्च कृत्रिमः ॥ दत्तात्मा च सहोढश्चापविद्धसुतस्त
था ॥ पिंडदोंशहरश्चैषां पूर्वाभावे परः परः ॥ एते द्वादश पुत्रास्तु संस्कार्याश्च द्विजातयः ॥ केचिदाहुर्द्विजे जातौ सं॥
स्कार्यौ कुंडगोलकौ ॥ अमृते च मृते पत्यौ जारजौ कुंडगोलकौ ॥ कार्पासक्षौमगोवालशणवल्कतृणादिकं ॥ सदा
संभवतो धार्यमुपवीतं द्विजातिभिः ॥ शुचौ देशे शुचिः सूत्रं संहतांगुलिमूलके ॥ आवेष्ट्य षण्णवत्यां तत्त्रिगुणी
कृत्य यत्नतः ॥ अब्लिंगकैस्त्रिभिः सम्यक्प्रक्षाल्योर्ध्ववृतं तु तत् ॥ अप्रदक्षिणमावृत्तं सावित्र्या त्रिगुणीकृतं ॥ अधःप्र
दक्षिणावृत्तं समं स्यान्नवसूत्रकं ॥ त्रिरावेष्ट्य दृढं बध्वा हरिब्रह्मेश्वरान्नमेत् यज्ञोपवीतं परममिति मंत्रेण धार

स्ऽ.स्रा० पेत सूत्रं ससलोमकं चेत्स्नात ततः क्षाला विलोमकं स्याविश्वादद्यासकृत्वोद्धिर्मंत्रिताभिस्तोऽक्षिपेत विच्छिन्नं चाप्यधोपातंमुक्त्वा
३ निर्मितमुत्सृजेत ॥ पद्मपत्र देशे रोचनाभ्यां चर्ष्टं तंप हृदि देते कटिं ॥ तद्धार्यमुपवीतं स्यात्रातिलंबं नेवोछ्रितं ॥ स्तनादूर्ध्वमथो
3 लोमेन धार्यं तु कदाचन ॥ ब्रह्मचारिण एवं स्यात स्नातस्य हे बहु निवा स्नीपमुन एपं वाव स्त्राभावेन दिष्यते ॥ ब्रलमस्त्रे
प्रसव्यं ऐ स्थिते यज्ञोपवीतिता ॥ प्राचीनावितिना सव्ये कंठस्थे तु निवीतिता ॥ वस्त्रं यज्ञोपवीतार्थे त्रिवृत्सूत्रमथापि वा ॥
कुर्यात्तंतु वालं तंतुरज्जो वा सर्वजातिषु इति यज्ञोपवीतविधिः ॥ ऐरवत्ता नि विप्रो देर जिनातितु ॥ अहतं वस्त्रमुग्मं
तु श्वेतं रक्तमथापि वा मोंजी त्रिवृत्सम श्लक्ष्णा दक्षिणावृत्तमेखला यथार्षेग्रंथिभि मौंजी त्रिवृत्सा दक्षिणावृतामुं
जाभावे तु कर्तव्या कुशारमंतकबल्वजैः अथ दंडलक्षणं ॥ पालाशा वास्तु सर्वेषां दंडा याज्ञिकवृक्षजाः ॥ पाला
शा बैल्व प्लक्षास्तेवटवेन स्वादिराः ॥ पेलवौडुंबराश्वत्थक्षाः क्रमा ह्विप्रादिषु स्मृताः ॥ न केशा भाछ्नासांत प्रमा
णा श्चक्रिपा हि जैः ॥ धार्या नित्लाक्षाः सदा धार्यं कौपिनं कटिसूत्रकं ॥ कौपीन महतं धार्यं खंडं वा वस्त्र पार्श्वयुक् ॥ य
ज्ञोपवीतमजिनं मौंजी दंडं च धारयेत ॥ नष्टे भ्रष्टे नवं मंत्रात् भ्रष्टं जले क्षिपेत् ॥ उपनयनानंतरं दिनत्रयं द्वादशरात्रं एन.
वर्षं वा अक्षारलवणाशी अधःशायी व्रतब्रह्मचारी उपनयनव्रतं चरेत ॥ सर्वत्र व्रतानेन यानि यज्ञोपवीतादीनि ३

१८ त्वोपवीणि त्यजेत्॥ कर्मणां सांगे अनियमः॥ निसंख्याध्यायाग्निकार्यं ब्रह्मयज्ञतर्पणानि कुर्वीरन्॥ अनिंद्येषु वि
प्रगृहेषु भिक्षां गुर्वाज्ञया चित्वा भोजनविधिना भुंजानो द्वादशाब्दं पंचाब्दं वेदग्रहणांतं वा ब्रह्मचारिव्रतं चरेत्॥ गुरु
शुश्रूषां स्वच्छंदसां साधनार्थं कुर्यात् उपाकर्मांतं वेदाब्दव्रतं तत्र स्त्री मधु मांसोच्छिष्टभुक्तपर्युषितताम्बूलदंतधावन
अवलेखकादिवास्वापछत्रपादुकागंधमाल्योद्वर्तनानुलेपनांजनजलक्रीडाद्यूतनृत्यगीतवाद्यासनापाश्लीलस्परिवा
दादीनां असमावर्तनाद्वर्जयेत्॥ तदेकापोवेद्या क्षौममधुमांसभक्षणे गुरूच्छिष्टभक्षणं श्राद्धे तु वर्जमेव॥ उपनयनव्र
तानंतरं सावित्रीव्रतं उपाकर्मांतं आरण्यकव्रतानि तथैव॥ उपाकर्मौषधिजनने सति श्रावणपर्वपौर्णमास्यां कार्यं॥ श्राव
णमासस्य श्रवणे वा पंचम्यां हस्ते पंचमी अहस्तसंयोगी वा कार्यं भाद्रपदमासस्य पौर्णिमास्यां वा श्रवणे वा हस्ते वा आ
षाढपौर्णमास्यां वा यथास्वाचारं कार्यं श्रवणे आद्यघटिकाचतुष्टयं अभिजिन्नक्षत्रांशत्वाद्वर्ज्यं॥ तिथिखंडे सति उदयव्या
पिनी प्रयोगपर्याप्ता तिथिरुपाकरणे ग्राह्या श्रवणखंडे सति धनिष्ठायुक्तं प्रयोगपर्याप्तं ग्राह्यं नोत्तराषाढसंयुक्तं॥ हस्तादि
क्षनक्षत्रेषु शुक्लपक्षे उदयव्यापिनी कृष्णपक्षे तु अस्तमयव्यापिनी प्रयोगपर्याप्ता ग्राह्या सूतकादिविघ्नसंभवे औषधमुल
संभावे श्रावणभाद्रपदयोरेकस्मिन्दिने ग्रहणसंक्रांतिवर्जिते कार्यं॥ कर्मणो नो लोपो नोपकर्षः मौंजीयज्ञोपवीतादिन
दद्याद्याशारपेत्॥ कटिसूत्रं च नवं नवं वस्त्रं तथैव च उपनयनाद उपाकर्मांतं सावित्रीव्रतं तत्संपूर्णार्थं विप्रसंबंधिबांधवभोजनं श्रा

स्म·सा० नयाकार्यं॥ततो वेदाब्दव्रतं ततः आरण्यकवेदव्रतानि प्रतिव्रतं चपवनं व्रतो नेभोजेनापेमे स्यमाहार्यं तेषु व्रतेषु लोपतां न
४ म्येन स्त्रीन् षट्द्वादशवाक्क्षुन्कृत्वा पुनर्व्रतं प्रारभेत॥ततो नंतरं उदगयने शुक्लपक्षे शुभे हनि स्वाध्यायमारभेत॥पूर्वाह्णे
५ यो त्राप्त सरस्वतिमिष्ट्वा देवतां गुरुं नत्वा तं च संपूज्य ब्रह्मचारि विप्रसुवासिनीरभ्यर्च्य आशिषो गृहीत्वा प्रशस्तपल्लवनदर्भासा
रूपमाणप्रणवमाहतिगायत्रीरुच्चार्य प्रणवपूर्वं स्वाध्यायं प्रारभ्य किंचिदधीत्य प्रणवेन समाप्य॥विरामो स्त्विति स्थित्वा
भूमिं दृष्ट्वा गपने शुक्लपक्षे शुभे हनि स्वाध्यायस्य षाग्रहं हस्वां नेमे पुः॥ततो परेसु प्रम(?)तिगणेशादीन् नत्वा गुरुं श्च नत्वा प्रणवेन
प्रारंभ समाप्तिं च कुर्युः इति ज्ञात्वा चारसंज्ञापेनाश्रापः॥ब्रह्मचारी संध्यामुपास्याग्निकार्यं कृत्वा गुरूपसंग्रहणं॥हस्तेन तो एव
भिवादनं हृस्वे पुनमस्कारं कुर्यात उपसंग्रहणं नाम अमुकगोत्रो देवदत्तशर्माहं भो अभिवादये सुत्कांककर्णौ स्पृष्ट्वा दक्षिणो
तरपाणिभ्यां गुरोर्दक्षिणपादं दक्षिणेहस्तेन सव्ये पादं सव्येहस्तेन गृहीत्वा शिरो वनमनं अभिवदने पादग्रहणं नास्ति पा
दस्पर्शने कार्यं नवा आयुष्मान्भव सौम्य देवदत्ताइति शुतो नमुकशर्मनिति प्रत्यभिवादः कार्यः॥आयुष्मान्भव सौम्य दे
वदत्तशर्मन् इति प्रत्यभिवादः आयुष्मान्भव सौम्येति वा अत्र गुरवो माता तत्स्मधात्री च पितापितामहादयो मातामहश्चा
त्रदोताभयत्राता आचार्यश्चोपनेता च मंत्रविद्योपदेष्टा च तेषां पत्न्यश्चोपसंग्राह्याः समवर्तनेन च बालेसमवयस्के वाध्याय एम·
के गुरुवच्चरेत॥मातुलाश्च पितृव्याश्च श्वशुराश्च पवीयांसोपि प्रत्युत्थायाभिवाद्याः॥उपाध्यायक्रत्विजो ज्येष्ठभ्रातर ४

अस्मर्वेषां पत्न्यश्चैवं ॥ मातृष्वसा पितृष्वसा च सवर्णा भ्रातृभार्या च नित्यमभिवंद्याः विप्रोषित एष संग्राह्या जातिरेवं धर्मो षितः ॥
विप्रोष्य विप्रकुशलं पृच्छेन्नृपमनामयं ॥ वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च ॥ नावाप्योदीक्षितो नाम्ना यवीयानपि सर्वथा
पूज्यैश्च तत्तमभिभाषेत भोभवत्कर्मनामभिः ॥ परपत्नीमसंबंधां भगिन्येति भाषयेत् त्रिवर्षपूर्वतः श्रोत्रियोभिवाद्यः आत्रि
वर्षाः संबंधिनो स्वल्पेनापि स्वयोनिजः ॥ अन्ये च दानहस्ताः श्व सदाचार आभिवादयेम् ॥ उदक्याः सूतिकान्नारीभर्तृघ्नी
गर्भघातिनी ॥ पाखंडं पतितं व्रात्यं महापातकिनं शठं ॥ नास्तिकं कितवं स्तेनं कृतघ्नं नाभिवादयेत ॥ मत्तं प्रमत्तमुन्मत्तं धावं
तमशुचिं नरं वमंतं जृंभमाणं च कुर्वंतं दंतधावनं अभ्युक्तशिरसं स्नानं कुर्वंतं नाभिवादयेत् ॥ जपयज्ञगणाच्छं च समित्पुष्प
कुशानलान् ॥ उदपात्राद्यभैक्षान्नं वहंतं नाभिवादयेत् ॥ अभिवाद्य द्विजश्रेष्ठं तानहोरात्रेण शुध्यति क्षत्रियवैश्याभिवादने
च विप्रः सैवं शूद्राद्यभिवादने त्रिरात्रं ॥ कायं तु रजकादिषु ॥ चांडालादिकसंस्पर्शे स्नानं इति संग्रहस्मृतिः देवताप्रतिमां दृष्ट्वा
यतिं चैव त्रिदंडिनं ॥ नमस्कारं न कुर्याच्चेदुपवासेन शुध्यति ॥ एवं वापि नमस्कार्याः सर्वावस्थासु सर्वदा ॥ अभिवादो नमस्का
रस्तु पापप्रत्यभिवादने ॥ अग्निर्वा पानमस्कार्यैव पत्कस्तु पुनर्नमेत् ॥ स्त्रियो नमस्या वृद्धाश्च वयस्या पत्न्यदेवताः ॥ ततः क्षिपीत
वेदांश्च स्वाध्याये गुरुशिक्षितः ॥ अथानाध्यायवक्ष्यंते ॥ अनाध्याये स्थ्यपने मत्तामा पुत्रजां धनं ॥ ब्रह्म लवीर्यं श्रियं तेजो नि

स्म०स० हंतातियमस्तपे ॥ मंत्रवीर्यस्य पभपादिंद्रोवीर्येण हंतिच ॥ ब्रह्म एसत्तवांतेनन एकंचभवेद्ध वे ॥ अष्टमीचतुर्दशी पर्वप्रति
५ पत्सु निसमहो एत्रमनाध्यापः ॥ अषकासुच ऐंद्र श्रवण द्वादशीमव रं ण्योश्च न सोपपदतिथोच ॥ स्थपनोत्थानद्वादशोश्च
5 अषाढीकार्तिकीमाघीफाल्गुनी सप्तमी पक्षद्वितीपासुच अपरपक्षांते प्रेतद्वितीपापांचमहानवंम्यां सप्तम्यांच युगादिषु ॥
शुक्लतृतीपा वैशाखे प्रेतपक्षत्रपोदशी कार्तिके नवमी शुक्ला माघे दर्शश्च पौर्णिमा ॥ एतो युगादयः प्रोक्ता दत्तस्याक्षपका
रकाः ॥ मन्वांतरादयः सर्वे ध्यादृतिकेचन अश्वयुक् शुक्लनवमी कार्तिके द्वादशी सिता ॥ तृतीपा चैत्रमासस्य सिता भाद्रपदस्य
च ॥ आषाढे शुक्लदशमी माघे साक्षुक्लसप्तमी श्रावणस्याष्टमी हृष्मातथाषाढी च पौर्णिमा ॥ फाल्गुनस्यत्वमावास्या पौषस्य
काद्दशी सिता फाल्गुनी कार्तिकी चैत्री जेष्ठपंचदशी सिता मन्वंतरादयश्चैता दत्तस्याक्षयकारका ॥ शवानुगमने परिकर
पोषु वा कारास्त्राव दर्शने चाहोरात्रे ॥ श्राद्धिकं प्रतिगृह्य चारण्यकमधीत्य च ॥ मनुष्यप्रभृतिनां देवानां च यज्ञानं विमुक्तोवा
होरात्रं स्वप्रांतमित्येके ॥ न वश्राद्धभुक्तौ त्वन्नजरणांतं सूतकान्नभोजने चैवं ॥ महैकोद्दिष्ट त्रिरात्रं गंधलेपक्षापांते वा ॥ म
हागुरौ मृते द्वादशरात्रं असपिंडे गुरौ त्रिरात्रं अचार्ये चउपाध्याये च पक्षिणी समानविद्ये सब्रह्मचारिणी च ॥ अचार्यभा रामः
र्यापुत्रशिष्येष्व होरात्रं ॥ ऋत्विक्पांज्ञां स्वयोनि संबंधे चैवं ॥ अग्निसाते गोविप्रमृतौ त्रिरात्रं ॥ उपाकर्मणि चोत्सर्गेत्र्यहं ५

॥वेदसमापने प्रथमसंध्याकृतदहोरात्रं॥परेयुश्चानध्यायः ग्रहणे तु रात्रौ मोक्षे त्रिरात्रं॥दिवामोक्षे त्र्यहं॥अयनेषु पक्षिणीति
र्वातभ्र कंपोल्कानिपातादिसर्वाङ्गते षु अकालिकोनध्यायः अभ्युसाते चाकालवृष्टौ च॥आर्द्रादि ज्येष्ठान्तात्कालादन्यत्राकाल
वृष्टिः॥सायंसंध्यागर्जिते उदयान्तोनध्यायः॥अर्धरात्राद्दूर्ध्वगर्जने अर्धरात्रे वाकालिकोनध्यायः॥प्रातःसंध्यागर्जने त्वहोरा
त्रं॥काकोलूककुक्कुटमूषकमंडूकाद्यन्तरागमने सति दिने चेद्दिनान्तं॥रात्रौ चेद्रात्र्यन्तमनध्यायः॥गवाश्वमहिषाजाविसुत्री
मृद्धादाव अहोरात्रं श्वमार्जारयोश्च॥अरण्यमार्जारसर्पनकुलपंचमंजारादौ त्रिरात्रं॥अरण्यपशुश्रृगालादिवानरराजकादौ
द्वादशरात्रं॥खरखराहोष्ट्रादिचंडालादिसूतकोदक्यात्रावादौ मासं॥गोरगवयाजादिवाराक्षोमनास्तिकादौ त्रिमासं॥ग्रामेष
श्वपाकादौ षण्मासं॥गजगंडभारसिंहव्याघ्रमहापापवृन्तप्रादौ वब्दमनध्यायः॥स्वाध्याये वा प्रवचने वर्तमाने तरगतो
॥आधिव्याधिसु विप्र पापानि गुरु शिष्ययोः॥शोभनगृहे शोभन दिने चानध्यायः विवाह मौञ्जि बंध प्रतिष्ठोद्यापनादि धाम
र्जने अस्तमाप्तेः पिंड सगोत्राणामनध्यायः॥पक्षे बाढबध्यान्तम त्विजामाचार्याणां च नध्याये समएत्राव नध्यायः॥एकान्तध्या
ये पुग्मलेत्वं सापरात्रे पध्यायः॥अनध्याय पुग्मे दिनास्पूर्वदिनपर रात्रौ चेत्सके॥प्रक्रोष्ट्यादेभोलूकसामबाणातैनिस्वने
॥अमेध्यश्रावमृड्डालसश्मशानपतितांत्तिकेदेशे शुचावात्मनि च विद्युत्स्तनितसंप्लुवे॥भुक्तार्द्रपाणिरंभोतरर्धरात्रे

स्म॰ १० तिमाहुते॥ यांसु प्रवेषर्षद्दिग्दाहे संध्यानीहारभूतिषु धावंतः प्रतिगंधे च शिष्ट्ये च गृहमागते॥ खरोष्ट्रयानहस्त्यश्वनौवृक्षेरिण
६ रोहणे सप्तत्रिंशत्सनाध्यायनितांत्सकालिकान्विदुः॥ सर्वकुत्सितगंधेषु पारिवेषे सभास्थिते॥ अभ्यंगस्नानकाले च महास्वरने
6 तिकंपने॥ गोविप्रशोधने सर्वश्राद्धेषु श्राद्धपंक्तिषु॥ ग्रामस्थलसमध्यकस्सकोविदारकपित्थयोः॥ श्लेष्मातकस्य छायापापांचितिता
त्कालिकान्विदुः चतुर्दश्यष्टमीपर्वप्रतिपत्स्वेव सर्वदा॥ इमं धात्वमनध्यायत्वं तु गमने पु च॥ तथा विस्मृतिशीलानां बहु
वेदप्रपाठिनां चतुर्दश्यष्टमी पर्वप्रतिपद्वर्जितेषु च॥ वेदांगमापमीमांसाधर्मशास्त्राणि चाभ्यसेत॥ उदयेस्तमयेवापि मुहू
र्तत्रयगामिपत्॥ तद्दिनं तदहोरात्रं अनध्यायविदो विदुः॥ केचिदाहुः क्वचिद्रेत्रो यावंतं दिननाडिकाः॥ तावदेवत्वनध्यायो
न तं निश्च दिनांतरे॥ उपवासव्रतादीनां तिथिमाहुस्तथैव तैः॥ चतुर्थ्यां पर्वरात्रे तु नवनाध्यायमद्दर्शने॥ नाध्येयं पूर्वरात्रौ
सप्तसप्तमीचत्रयोदशी॥ अर्धरात्रास्तु रात्र्यावेनाध्यायं पूर्वरात्रके॥ प्रणवव्याहृतीनां च सावित्र्याः शिरसस्तथा॥ नित्ये नै
मित्तके काम्ये तत्तेप्रोक्ततैतथा॥ प्रह्तेकाम्यकार्ये च नानध्यायास्मृतास्तथा॥ देवतार्चनमंत्राणां नानध्यायस्मृतः सदा
अथोत्सर्जनं॥ ततः सार्धचतुर्मासान्पंचमासान्वा अधीत्य पौषमासे रोहिण्यां मध्यकायां वा पौषे माघे फाल्गुने वा शुक्लपक्षे एम॰
प्रतिपद्यस्मिन्मन्वादिपौर्णमास्यां वा सह शिष्यैः ग्रामाद्बहिर्जलांतरे उत्सर्जनं तर्पणं कार्यं॥ वर्षं वाधिसोपाकर्मदिने उत्सर्जनं ६

कार्यं न वा तर्पणं नुकार्यमेव॥ एवं वेदव्रतानि वोभयं वा पारं नीत्वाविप्लुतब्रह्मचर्यो विंद्युवेव तमापश्रितो गृहं स्येप्रजनद
नुरूपां समावर्त्तो विवहेत॥ इति ब्रह्मचारिप्रकरणं॥ अथ विवाहः॥ मातृतः पितृतः शुद्धामभिरूपां गुणान्वितां अदीर्घरोगां
संचारियोगयानित्सवर्जितां॥ असपिंडां च पितृतः सप्तमात्पुरुषात्परां॥ मातृतः पंचमादूर्ध्वमसमानार्षगोत्रजां॥ अनन्यो
ढां भ्रातृमतीं॥ स्विपंकमां यवीयसीं॥ पुमान्‌ धीमान्‌ स्वरोधी रोहिजो वर्णानुपूर्वतः॥ विवाहे धर्ममार्गेण ब्राह्म्यादिषु यथाविधिः
॥ मातुलस्य सुतां केचित्‌ पितृष्वसृसुतादिकां विवाहेंति कचिद्देशे संकोच्यापि सपिंडितां॥ दद्याच्च प्रतिगृह्णीयात्तस्मात्त्वेव सु
समाहितः॥ ब्राह्मे विवाह आहूय दीयते शक्त्यलंकृता॥ दैवो विवाहः कन्यायाः ऋत्विजे दानमुच्यते॥ आर्षो गोमिथुनं दत्ते कन्यादा
नं प्रदातरि॥ प्राजापत्यः सहधर्मं चरतामिति दानतः॥ आसुरो द्रविणादानाद्गांधर्वः समयान्मिथः॥ राक्षसो युद्धहरणात्पै
शाचः कन्यकाछलात्‌॥ ब्राह्मदैवार्षप्राजापत्या धर्माः आसुरगांधर्वराक्षसपैशाचा अधर्माः॥ तत्राद्याश्चत्वारो विप्रस्यैव राक्ष
सः क्षत्रियस्यैव॥ इतरे त्रयः सर्वेषां ब्राह्म्यादिषु पूर्वं होमः कर्तव्यः॥ पश्चात्कन्यास्वीकारः॥ आसुरादिषु पूर्वं स्वीकारः पश्चाद्धो
मकार्यः॥ पिता पितामहो भ्राता पितृव्यो गोत्रजो गुरुः मातामहो मातुलो वा कन्यादा बांधवाः क्रमात्‌॥ पित्रादिदात्रभावे तु कन्या
कुर्यात्स्वयंवरं॥ वरदेशांतरे गते पंचर्तून्संप्रतीक्ष्येत॥ कन्यामन्यस्मै प्रदातुं वाग्दाने तु कृते सति॥ वरे देशांतरगते त्रीनृ

 तत्संप्रतीक्षयेत् ॥ कंमान्मस्मैप्रदातव्या वाग्दाने तु कृते सति मृते तेन्यस्मैप्रदातव्या वरे समपदास्तुरा ॥ पुरा पुरुषसंभोगान्म
 त्तेदेशेतिकेचनऋतावदृष्टेकन्यैचपुनर्दैयेतिकेचन ॥ अगर्भधारणात्कन्यापुनर्दैयेतिचापरे ॥ देशकालादिमेधर्मा अ
नुष्ठेयाविजानतो ॥ कुलशीलविहीनस्य षंठाते पतितस्यच ॥ अपस्मारिविकर्मस्थरोगिणोवेषधारिणां दत्तामपिहरेत्कं
मासगोत्रोढांतथैवच ॥ मंत्रसंस्काररहितादेयान्यस्मैवरायतुकन्यातुदूषितावर्ज्यादेयान्यस्मैवरायसाअन्यथातुहरंदंडोष
षंदद्याच्चसोदयं ॥ षंठांधवधिरादीनांविवाहोस्तियथोचितं ॥ विवाहारंभवेतेषांकनिष्ठोविवहेत्तदा ॥ षंठांधवधिरस्त
ब्धजडगद्गदपंगुषुकुब्जवामनरोगार्तभुक्तांगीविकलांगिषु ॥ ध्वस्तपुंस्त्वेचमत्तेवप्रापनस्थेनिरिंद्रिये ॥ नकोन्यतेषुसर्वे
षुनदोषःपरिवेदिने ॥ पितृव्यपुत्रेसापत्नेपरदारसुतादिषु ॥ विवाहाधानयज्ञादौपरिवेदाद्यदूषणं ॥ ज्येष्ठभ्रात्रोप्यनुज्ञा
तेपरिवेदाद्यदूषणं ॥ पितुःस्वसपत्नंज्ञातेनादधीतकदाचन ॥ पाणिग्राह्यःसवर्णासुगृह्णीयात्क्षत्रियाशरं ॥ वैश्यप्रतो
दमादद्याद्विवाहेब्राह्मणस्यतु ॥ सवर्णेभ्यःसवर्णासुजायंतेहिसजातयः ॥ अनिंद्येषुविवाहेषुपुत्राःसंतानवर्धनाः ॥ वि
प्रान्मूर्धावसिक्तोहिक्षत्रियायांविशःस्त्रियां ॥ अंबष्ठःशूद्र्यांनिषादोजातःपारशवोपिवा ॥ वैश्यासुशूद्रोस्त्र्यांराजन्यामामाहि 
षोग्रौसुतौस्मृतौवैश्यात्तुकरणःशूद्र्यांविन्नास्वेषविधिःस्मृतः ॥ एतेत्वनुलोमजाःपुत्राःसंस्कार्याःस्युर्द्विजातयः ॥ तस्यामस्त्री 

भिषिक्ता द्विजातिजाश्च द्विजातयः ॥ ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेहकस्तथा ॥ शूद्राज्जातश्च चांडालः सर्वधर्मबहिः कृ-
तः ॥ क्षत्रियामागधं वैश्याच्छूद्रात्क्षत्तारमेव च ॥ शूद्रादायोगवं वैश्या जनयामास वै सुतं ॥ माहिष्येण करण्यां तु रथकारः
प्रजायते ॥ इत्यादि प्रतिलोमास्ते हि जधर्मबहिष्कृताः ॥ विवाहाग्न्याधापञ्चहूदेवाग्निहोत्रकं ॥ दर्शपौर्णमासाग्रयणसोम
यागानक्रमाच्चरेत् ॥ सर्वयाम्प्रथमं सोमयागः कार्यो द्विजातिभिः ॥ यथा सोमविनांगेन फलं दत्वापि दक्षिणां ॥ ब्रह्मस्वब्रह्म
पात्वादि महादोषोपशांतये सूर्यग्रहकुरुक्षेत्रे मेषीकृष्णाजिनादिकं ॥ चांडालात्प्रतिग्रहात्रापि यजेत्मैत्ररूपकैर्मखैः अथवो
पासनं हुत्वा जुहूनर्ग्मत्राणि वाचरेत् ॥ अर्थाधाने महाश्रेयो ग्रासे श्रौताभयापहं ॥ एकं लंस्त्री गताभर्तुपिंडे गोत्रे च सूतके ॥
सत्यामन्यां सवर्णायां धर्मकार्ये न कारयेत् ॥ सवर्णासु विधौ धर्म्ये ज्येष्ठया न विनेतरा ॥ आज्ञासंपादिनीं दक्षां पुत्रसूं प्रिय-
याप्सु चिः ॥ योनिज्याधर्मकार्येषु नाधिवेद्या कथंचन ॥ ज्ञात्वा भर्त्राप्यसुचिर्दक्षानि योज्या धर्मकर्मसु ॥ अशुश्रूषां ज्यारणीमशु-
द्रां दूषितां वा विवर्जयेत् ॥ सुरापा व्याधिता धूर्ता वंध्यार्थघ्न्यप्रियाम्बुचिः ॥ स्त्रीप्रसूश्चाधिवेत्तव्या पतिद्विड्मृतप्रजा ॥ ग्र-
हस्थ स्त्रुक्षडग्निः स्यात् पंचाग्निश्चतुरग्निकः ॥ द्व्यग्नि स्यात्ग्निरथैकाग्निर्नाहोनः कथंचन ॥ गार्हमौपासने कुर्यात्सर्वाधानी तु
लौकिके ॥ स्मार्तं च लौकिके कार्यं श्रौतं वैतानिकाग्निषु ॥ अथ गोत्रप्रवरनिर्णयो वर्ण्यते ॥ जमदग्निर्भरद्वाजो विश्वामित्रो

स्म॰ सा॰ थगौतमः॥वसिष्ठः कश्यपागस्त्यामुनयो गोत्रकारिणः॥एतेषां यान्यपत्यानि तानि गोत्राणि मन्वते॥त्रिप्रमाणतपावापि स
८ तपावानुवर्तर्णने॥एकस्य द्व्यपतेपत्र तद्गोत्रं तस्य कथ्यते॥समानेमुनिभ्यः एकप्रवरतामपि॥समानप्रवरत्वं च द्वे यो बो
९ धापनोब्रवीत्॥मुनिप्रणीतप्रवरैर्भ्रमः पंचांत्रातोवपंअनंतान्यपिगोत्राणि वर्गीकृत्याभिदध्महे जामदग्न्यावत्सविदार्वार्ष्टि
षेणाः परस्परं नान्वपुः प्रवरैक्येन सगोत्रत्वन चादिमौ॥पस्काम्रित्रपुवोवेभाश्युनकाः प्रवरैक्यतः॥स्वं स्वं हित्वा गणं सर्वे
विवहेपुः प्रएवरैः॥उक्ताः सप्तसम्यगोर्वैश्चावस्यन्तेगिरसो गणाः छगौतमाः सप्तआपथस्याः रहंतस्तथापरे॥कौमंडादी
र्घतमसस्ततः कारेणुपालयः॥वादेमवाज्ञौग्रानसागोत्रेप्यैकाच्च नान्विपुः भरद्वाजाः सकपयोगगौरीक्षपाणाद्रतिः॥वत्सारे
पिभरद्वाजागोत्रैक्यान्नान्वपुर्मिथः॥केवलांगिरसः स्वेके विष्णुवृद्धाः सकण्वजाः॥हरितारथ्यीतएश्वमुद्कलः प्रवरैक्यतः
स्वंस्वंहित्वागणं सर्वे विवहेपुः प्रएवरे॥षोडत्र्यांगिरसास्त्रेधा मोताः संकृतिषास्तथा॥संकृतीनाहि वंश्यस्त्वाहु सिषैश्च
चतुर्विधैः॥स्ववर्गीयैः स्वगोत्रत्वालवरैक्याच्चनान्वपुः॥वत्साऐत्रपआत्रेयावाधद्रूतगविष्ठिरः॥मुद्गलाश्चेतिगो
त्रैक्यात प्रवरैक्याच्चनान्वपुः॥त्रयं चकश्यपस्त्रपगणानैध्रुवारेभश्वांडिलाः॥गोत्रैक्यात्प्रवरैक्याच्चनोद्वहेपुः परस्प एम॰
रं॥वशिष्ठैः काश्यपैर्निस्सं लौगाक्षीणामनन्वपः॥अहर्वैशिष्ठतो कि स्तुभ पाजाग्न्यादिगोचणावशिष्ठाकुंडिनाश्चैव ८

मुपमन्युपराशराः॥ वसिष्ठादिति चत्वारो गोत्रैक्यान्नान्विपुर्मिथः॥ कुशिकाद्रोहितगणादैक्षकामकापपीः॥ कताधनंजयाआ
जाअघमर्षणपूरणाः॥ इंदुकौशिकजाश्चेति विश्वामित्रगणाद्दश॥ नोद्वहेयुः सगोत्रत्वात्कविश्वप्रवरैक्यतः॥ आगस्त्यः संभ
वाहाः सोमवाहइति त्रयः॥ गोत्रैक्यात्प्रवरैक्याच्च नोद्वहेयुः परस्परं॥ वर्गा एकोनपंचाशत् प्रसिद्धा मुनिभिः स्मृताः॥ अप्रसिद्धाः
परेवंश्या अंतर्भूता इहैव ते॥ विश्वामित्रात्रिगोत्रेणा नोद्वहेयुर्धनंजयाः॥ अत्रैकपुत्रिकापुत्रा वामदेव्यादयस्तथा॥ तथै
वजातुकर्ण्याश्च वसिष्ठैरत्रिभिः सह॥ भरद्वाजेन शुंगेन विश्वामित्रस्य शैशिरैः॥ क्षेत्रेजातो द्विगोत्रर्षिः प्रोच्यते शांगशैशि
रिः॥ विश्वामित्रभरद्वाजैर्विश्वामित्रैश्च नान्वयः॥ वगुरोः सगोत्रवरणे नोद्वाह्यः क्षत्रविड्जनैः॥ स्वगोत्राद्यनभिधेश्च नान्व
यः॥ वगुरोः सगोत्रप्रवरे नोद्वाह्यः क्षत्रविड्जनैः॥ स्वगोत्राद्ध विप्रैर्वार्यगोत्रजाः॥ दानादिना सगोत्राः स्युर्दत्तागुरुगोत्रि
णः॥ समानप्रवरोद्वाहनिषेधः क्षत्रवैश्ययोः॥ प्रवरान्मानवेस्तस्मात् प्रवराख्यान्सगोत्रताः॥ इत्थं स्वगोत्रसंबंधविवाहविष
ये स्थिते॥ यदि कश्चिदज्ञानतस्तां कन्यामुपगच्छति॥ गुरुतल्पव्रताच्छुद्धो गर्भस्तज्जो सजातो व्रजेत्॥ भोगतस्तां परित्यज्य पा
लयेज्जननीमिव॥ अज्ञानाद्दैवदैवैः शुध्येत्रिभिर्गर्भस्त्वकश्यपः॥ महद्भिर्महतोपलातरक्तः प्रवरनिर्णयः॥ जामदग्न्याव
त्सविदाआर्ष्टिषेणतत्वैवचपंचावर्तिइत्येतेऽपिचतुर्वर्तिनः॥ छ॥ विवाहेविततेतंत्रेहोमकालउपस्थिते॥ कन्या

स्मृ॰सा॰ स्तु मतो हस्त्वा कार्यं कुर्वन्ति याज्ञिकाः॥ स्नापयित्वा तु तां कन्या सर्वे पित्रा यथाविधिः॥ पुंजानामाहुतिं हुत्वा ततः कर्म प्रवर्त
६ ते॥ षष्ठी॥ विवाहहोमे प्रक्रान्ते यदि कन्या रजस्वला॥ त्रिरात्रं दंपती स्यातां पृथक् शय्यासनाशनौ॥ चतुर्थेऽहनि सुस्नातौ त
9 स्मिन्नग्नौ यथाविधिः विवाहहोमं कुर्यातां इत्यादि स्मृति संग्रहः॥ विवाहे दंपती स्यातां त्रिरात्रं ब्रह्मचारिणौ॥ अलंकृता वधा
श्चैव सह शय्यासनाशनौ॥ अधर्मेषु विवाहेषु तांबूलमनुमोदनं॥ हवनं भोजनं चैव वर्जियेत्सर्वथा द्विजः॥ आसुरे तु प
वाशस्याग्दांधर्वेषु त्रिरात्रकं॥ एकाहे चैव पैशाचे कुर्याच्चाद्रायणं तथा॥ गर्भाधानादिसंस्कारे पित्रापूर्तं कृषिषुपितृशि
श्राद्धं पुण्यकार्यं कर्मादौ स्वस्तिवाचनं॥ हृष्टमुखास्तु पितरो हृष्टिश्राद्धे भुंजते॥ चूडाहोमावसाने तु बालमुखाः प्रभुंज
ते॥ वसवो रुद्रा आदित्याः अवस्थाः कामरूपिणः॥ बालायुवानो हृष्टाश्च पितॄणामाश्रयाः स्मृताः॥ प्रेतानामाश्रयो रुद्राय
मश्चैवांतकः स्मृतः॥ असंस्कृत प्रमीतानां त्वात्मा विष्णुः समाश्रयः अनाश्रितानां जीवानां दत्तं नैवोपतिष्ठति॥ प्रारंभादू
र्ध्वमाशौचे हि विवाहः कार्य एव तु॥ प्रारंभो वरणं यज्ञे संकल्पो व्रतसत्रयोः॥ नांदीश्राद्धं विवाहादौ श्राद्धे पाकपरिक्रिया॥
निमंत्रणं वा श्राद्धे तु प्रारंभः स्यादिति स्मृतिः॥ गयो त्राः क्रियमाणानामेकं स्यान्मात्भोजनं॥ हक्षिः श्राद्धं व तंत्रं स्याद्धोमा एम॰
त्मासाः पृथक् पृथक्॥ अथ आह्निकं मुच्यते तत्र प्रभाते उत्थाय इष्टदेवतां मनस्कृत्वा ततो दहः हत्संस्मृत्वा संध्योपासनं कु ६

र्यात्॥ तत्र मूत्रपुरीषोत्सर्गमेवं कुर्यात् अवानस्य सायाज्ञिकस्य शुष्ककाष्ठलोष्ठतृणपर्णादिकं गृहीत्वा शिरः प्रावृत्य यज्ञो
पवीतं निवीतं पृष्ठतः कंठलंबितं कृत्वा एकवस्त्रश्चेद्दक्षिणकर्णे निधाय दिगवलोकनमकृत्वा काष्ठाद्यंतर्धानं कु
र्यान्न वा॥ मौनं वा घ्राणस्यपिधानं चक्रमात्कृत्वा दिवा संध्योरुदङ्मुखो रात्रौ दक्षिणामुखो मूत्रपुरीषोत्सर्जनं कुर्यात्॥
फालकृष्टे जले। चीत्यां वल्मीके गिरिमस्तके॥ देवालये नदीतीरे दर्भपुष्पेषु शाद्वले॥ ससत्त्वेषु गर्तेषु मार्गे गोष्ठांबु
भस्मसु॥ अग्नौ च गच्छंस्तिष्ठंश्च विष्ठां मूत्रं न चोत्सृजेत् वायुवग्न्यर्कगोसोमसंध्यां बुद्ध्वा द्विजन्मनः॥ पत्रूपेन मिस्तवश्चै
व विष्ठां मूत्रं च नोत्सृजेत्॥ सर्वे निषेधा नैव स्युः प्राणबाधस्य पेषु च॥ काष्ठादिनांतर्धान छन्नममेध्यं निमज्जीतिवो
॥ रथ्यां वरत्वतीर्थेषु न्म ग्रामे गोमये जले॥ अगारे गाणि सप्राणपत्नम मीषु नोत्सृजेत्॥ कंदमूलफलांगारैना
मेध्यं निमज्जीत वै॥ इति मूत्रपुरीषोत्सर्गविधिः॥ अथ शौचवि०॥ शौचे यत्नः सदा कार्यः शौचमूलो द्विजः स्मृतः॥ शौ
चाचारविहीनस्य समस्तं कर्म निष्फलं॥ शौचं च द्विविधं प्रोक्तं बाह्यमभ्यंतरं तथा॥ मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्त
थांतरं॥ गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्जलैः॥ गंधलेपक्षयकरं शौचं कुर्यादतंद्रितः॥ अंतर्जले देवगृहे वल्मी
कमूषकस्थले॥ कृतशौचावशिष्टाश्च न ग्राह्याः पंच मृत्तिकाः॥ मार्गे खरस्मशानच्छाः पांसुलामलिनास्त्यजेत्॥ की

स्मृ॰सा॰ एंगालिप्यिरहितामाहेष्ठ्वर्काएन्वितां॥ वापीकूपतडागेषु नाहरेन्मृत्तिकां॥ अंतर्जलगताग्राह्यापरतोमणिबंध
१० नात्॥ अरण्ये पके पुले वे स्याद्ग्रामे ग्राहरणे विदुः॥ मंत्रे॥ एका तु मृत्तिका लिंगे तिस्रः सव्ये करे स्मृताः॥ करद्वये मृद्द्वयं
10 स्यान्मूत्रमाणमनेकधा॥ त्रिपर्वपूरमात्रा वा मृत्तिका स्फः प्रमाणिका॥ आर्द्रमिलकमात्रा वा मंत्रशौचे तु मृत्तिका॥
मूत्रात्तु द्विगुणं शुक्रे मैथुने त्रिगुणं स्मृतं॥॥ पुरीषे॥॥ पंचापाने मृदः सेप्या करे वामे दशः स्मृताः॥ करयोः सप्तदा तथा
पुरीषे मृत्प्रमाणको॥ अर्धप्रसृतिमात्रा वा स्यात्तदर्धा स्यात्ततः परः॥ पहापाने मृदे स्ति त्रप्रसृत्यर्थं त्रिभागिकाः॥ पहाप्रसृ
तिमात्रा त्रिस्यापोपाण्यो वध्यकृपथ्यकं॥ एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणां॥ त्रिगुणं स्याद्वनस्थानां यतीनां च चतु
र्गुणं॥ दिवा प्रहितं शौचं तदर्धं निशि कीर्तितं॥ तदर्धमातुरे प्रोक्तं मातुरस्यार्धमध्वनि स्त्रीशूद्रादेरशक्तानां बालानां
नांचोपनीतितः॥ गंधलेपक्षयकरं शौचं कुर्यान्न संख्यया॥ एकैकपाम्दा हस्तौ पादौ प्रक्षालयेत्ततः॥ इति शौचविधिः
॥ अथाचमनविधिः॥ तत्र हस्तपादौ प्रक्षाल्य यज्ञोपवीती पादौ भूमौ प्रतिष्ठाप्य बद्धकच्छो बद्धशिखः पुंडरीकाक्षमि
त्युद्देवं स्मृत्वा प्रकृतिस्थं फेनबुद्बुदरहितं संहितांगुलिना पाणिना वृगृहीत्वा गोकर्णाकृतिकं पाणिं मुक्त्वा त्रौषवीक्षितं ब्रह्म राम॰
तीर्थेन त्रिः चतुर्वा समाहितः पिबेत्॥ कायेन तीर्थेन वा दैवेन वा पिबेत् न पित्र्येण कदाचन पीत्वा हस्तौ प्रक्षाल्य ओष्ठौ १०

वंतः संकोच्य संहतांगुष्ठमूलेनालोमकेन मुखं द्विःप्रमृज्यात ॥ हस्तौ प्रक्षाल्य संहतांगुलिभिः मुखं सकृदवमृज्य हस्तौ प्रक्षा
ल्य पादौ शिरः अभ्युक्षेत नवा संहतांगुलिभिरास्यं सव्योमप्रदेशौ स्पृष्ट्वा हस्तं प्रक्षाल्य अंगुष्ठप्रदेशिनीभ्यां घ्राणे स्पृशेत ॥ अं
गुष्ठानामिकाभ्यां चक्षुषी श्रोत्रे च स्पृशेत ॥ अंगुष्ठकनिष्ठिकाभ्यां नाभिं हृदयं तलेन ॥ सर्वांगुलिभिः शिरः ॥ बाहुमूले सर्वां
गुल्यग्रैः स्पृशेत सर्वत्र मध्येऽप उपस्पृशेत ॥ हस्ताभ्यामञ्जलौ त्रिः पीत्वा हस्तं प्रक्षाल्य मुखं प्रमृज्य त्रिभिः स्पृशेत ॥ अस्पृश्यातो ह
स्तेपीत्वा श्रोत्रे स्पृशेत हृत्कंठतालुगाभिः स्युरद्भिः शुद्ध्यः क्रमाद्द्विजाः ॥ स्त्रीशूद्रादयस्तत स्पृष्टाभिः प्रक्षालने वर्षधाराभिः आ
चमेत न तत्राभिः कारणात ॥ कनिष्ठादेशिन्यंगुष्ठमूलेषु काम पित्र्यब्राह्मणतीर्थानि ॥ करणाग्रे देवतीर्थं करमध्ये सौम्यं तीर्थं
अग्नितीर्थं वा निर्वपणसंप्रपण लाजाहोम नित्यहोमान्नकापेन तीर्थेन कुर्यात ॥ दैविकं चाअर्चनं दैविकं च बलिप्रक्षेप
पापपुक्षणमार्जन भोजन नित्यहोमादि देवेन दैविकं वा ॥ पैतृकं पित्र्येन ॥ कमंडलुस्पर्शनं दधिप्राशने चात्र प्राशनं सुएगृह
णं दैवं कच सौम्येन कुर्यात ॥ आग्नेयेन प्रतिग्रहं कुर्यात ॥ अथाचमननिमित्तानि ॥ उच्छिष्टस्पर्शने पादावसेचने शिखा
मोक्षे परोपवीतापगमे च उदकमृत्तीर्णावर्तिर्य बुसर्वेष्टा चामेत ॥ अस्पृगतस्मश्रुस्पर्शने चालोमकोष्ठस्पर्शने वदने गमने
च दंतसक्तस्य जिह्वा स्पर्शने च रथ्याप्रसर्पणे च अश्लेहे पंचनखोच्छिष्टस्पर्शने च रोदने च विषमत्रेतः शौचांते च पीत्वा जि

स्मृ॰सा॰ ह्वा बच्छिष्टे च दंतसक्ते निष्ठीवने च देवताभिगमने च द्विराचामेत्॥ स्नात्वा पीत्वा क्षुत्वा च लिढे च निष्ठीव्य सुप्त्वा अधोवासो वि
११ परिधाय च तथोत्तरीयपरिधाने च॥ अभ्यंगे हविर्भक्षणे च कृते द्विराचामेत्॥ भोजने हविर्दाने उपहारप्रतिग्रहे॥ संध्या
॥ त्रयां बुपानेषु पूर्वं पश्चाद्द्विराचमेत्॥ स्वाध्याये च वस्त्रादिसहितदालंभ्यांके निधाय वा तत्सहित आचांतः शुध्येत्॥ निधाय
वाचम्य वस्त्रादिकं प्रोक्षयेत्॥ अन्नपानादिहस्त उच्छिष्टस्पृष्टश्चेत्तिधात्रि पाचम्य नव वस्त्रादिकं प्रोक्षयेत्॥ अन्नादि
क्षाद्यातौ तु तदालभ्यांके निधाय वा श्रोचाचमनं कुर्यात्॥ परिवेषणं कुर्वन्नुच्छिष्टस्पृष्टश्चेत् अंत्र पात्रं निधायाचम्यापरिवे
ष्यात्॥ परिवेषणं कुर्वन्नत्राद्युच्छिष्टश्चेदन्नादिकं निधाय श्रोचाचमने कृत्वान्नादिकं प्रोक्ष्याग्निर्कमर्वा संस्पृश्य परिवेष्या
त्॥ परिवेषणे रजो दृष्टौ तस्य पादन्नस्य त्यागः॥ अन्नाधारे चांडालं सूतिकोदक्यापतितादिस्पर्शे च त्याग एव॥ रजकादि
स्पृष्टे तु जलेनाभ्युक्ष्याग्निमर्कं वा स्पर्शयेत्॥ उच्छिष्टोपहतस्त्रीशूद्रसंभाषणे वास्पृश्यदर्शने च पित्र्यमंत्राननु ब्रुवपो आला
लंभे च प्रोक्षेपो च जधोवा पुरुषमुत्सर्गे अर्कं देक्रोधने क्षुते॥ मार्जारमूषकस्पर्शे प्रहासोष्ठीवने नृतेश्व संत संभाषणेवदर्श
नेव कर्म कुर्वन्नाचामेत् पैतृकादि कर्म कुर्वन्नाचामेत्॥ श्वकाकादिस्पर्शे नैवैवं॥ अकर्म कुर्वन् पूर्वं तु दक्षिणं श्रवणं स्पृशे एम॰
येत् अनुष्ठानेष्वग्निगोविप्रस्त्री च्युतकेशानलस्पर्शने विनिलंसवेचापः स्पृशेत्॥ अर्द्रतृणं गोमयं वा भूमिं वा ओषधिं वाद ११

क्षिणकर्णं वा स्पृशेत॥ अंगानि कारतः पपालेदस्पर्शने तु प्रस्मृत्वा वा दिस्पृशेत॥ अपत्य नैमित्तिक कर्मांगाचमनस्थाने श्रो
द्रिस्पर्शनं स्यात॥ मन शुद्ध्यर्थं अग्नितीर्थानि वेदाश्च वह्णा कोर्द्रवा पवः॥ विप्रस्य दक्षिणे कर्णे नित्यं तिष्ठंति पूजिताः॥ जपहो
मप्रदाने षु पितृपिंडोदकादिषु॥ हुते षाचमनं कार्यं पितृकार्येषु सर्वदा॥ नास्पृष्ट्वा स्पृष्ट्वापि नाचामेत॥ न फलकाशासनासी
नोन त्रिपाद्यां नान्मार्थं अशने भोजनार्थं स्नाने भुक्त्वाचामे द्धानामासनेनत्र्यापन पानपादुकोपानच्छत्रो न दुर्देवीन पादग्रहच्छे
नमहो न तिष्ठन्न हसंजल्पानप्रणतो नान्यमनानविलोकयन्न नसहन्नन च दंनन जल्पनन्नमौने कवस्त्रो मांजलिनान परस्पृष्टो
न वामहस्तेन न बहिर्जानुकरो नुप्रौठपादो न प्रसारितपादो न बद्धासनो न गलेबद्धो नावेष्टितशिरः नोपवीत तरीय
वाऽभावप्याधृत्वानाचामेत॥ तत्र सम्यक्धृत्वा पुनराचामेत॥ यज्ञोपवीतेन वेष्टमस्तत्रे वस्त्रे चोपवीपाचामेत॥ वामहस्ते
कुशो वामदर्भैर्वा स्थिते दक्षिणेन न पिबेत्तत एव तदुष्टं॥ आचमनादुत्क्षिप्तं पूर्वं दुरतो वर्जयेत॥ न चांगुलिभिराचामेन्नाती
र्थेन न शब्दवतनावीक्षितं नाल्पेभावेनो स्पृंजलमकारणात॥ वामेन पात्रमुद्धृत्य न पिबेद्दक्षिणेन तु॥ सौवर्णरौप्यताम्रैश्च
वेणुबिल्वाश्मचर्मभिः॥ अलाबुदारुपर्णैश्च नारिकेलैः कपित्थकैः॥ तृणकाष्ठैर्जलाधारैर्न्मांतरितमप्यपेठ॥ वामेनोद्धृ
त्यावा चामेद्धन्यदा तु रसंभतथाम्भस्य पपात्र स्थं जलं वोपहंन्यते॥ तीर्थतोपचमुष्टेत्वकारकादिक्षितं सदा॥ पादशौ
चं शिरश्वाकबंधं धौतोपवीतिकं॥ विनाचांतोमशुचिर्नित्यं वहंकंठे शिरस्यपि॥ पवित्रकरआचामेशुचिः कर्मार्थमाद

स्मृ॰सा॰ एतत् ॥ कुशामात्रकरो वापीदर्भमात्रकरोपि वा ॥ तदोंकारेणाचमनं पदाव्याहृतिभिर्भवेत् ॥ सावित्र्या वापि कर्तव्यमपह्लाकार्यममं
१२ त्रकं ॥ तत्कुशं विधिवन्नत्र नेन सृजेदन्यथा त्यजेत् ॥ अमेदर्भा स्तुसंस्ताज्ज्यात्यजेद्दूर्वो पुरेव तु ॥ न पादप्रक्षालनशेषमाचमेत ॥ ना
मावमनशेषेण पद्याचामेत् अभौजले स्नावपित्वाचामेत् नपीतोदकशेषेणाचामेत ॥ नाम्बुदकशेषेण कर्म कुर्यात् यदि कुर्या
त् अभौजले ह्लावपित्वा तत्रांबुपात्रं स्थापयित्वोत्सृत्य कर्माणि कुर्यात् ॥ तथाचमनापवादः ॥ आस्निग्धमौषदे दग्धे स्निग्धे वुसे
सलेपने नाचामेद्भोजने वृते शुध्यर्थेक्रमुकादिषु ॥ अन्येषु चमभक्षेषु संभारेषु स्नगंधिषु बल्लेक्रमुके होमे भुक्तलेहानुलेप
ने ॥ दन्तकाष्ठे तिले मूले पत्रपुष्पजलेषु च ॥ तथा त्वकूर्पणकाष्ठेषु नावामेदामभक्षणे ॥ मधुपर्के च सोमे च प्राणाहुतिषु वा
स्मृच ॥ अस्य होमेषु सर्वेषु नोच्छिष्टो भवति द्विजः ॥ दंतवद्दंतलग्नेर सान्नाने जिह्वया स्पर्शं चेच्छुद्धं तत्र कर्णस्पर्शनेन अन्यं स्त्रासग
तं शुद्धं अन्येन वा तेन तत्स्थानाच्युते च निगिरंस्तन्वा कर्णस्पर्शमुपदात् निगीर्णे कर्णस्पर्शःत्वा सपाके चमनं रसज्ञाने त्वसंभारे हि
ए चमनमिष्यते ॥ अन्यं चास्यगतं चैवं आचांते त्ववशिष्टकं ॥ आस्यस्थं शोधयेद्यत्नाद्दंताश्च मृदुपलतः ॥ दंत वेधे महत्पापं स्फो
मघसमं विदुः एवं कृते यतिच्छिन्ने स्यात् न तद्दोषा पसर्वदा ॥ ओष्ठस्मश्रुगतो लेपः शुद्ध प्रक्षालितश्छितः ॥ मुखजा विप्रुषः स्य
स्पृष्टा स्याः स्वाश्च पराश्च ताः ॥ स्थूलाश्च विप्रुषः शुद्धा यद्यंगेन पतंति ताः ॥ अंगपाते तु प्रक्षाल्य वाचामेच्च परस्य चेत् विड्या एम॰
चमनं कुर्युरन्यंगे पतिते ष्वपि ॥ वेदाभ्यासे मुखाज्जाताः शुद्धा एव तु सर्वतः श्मश्रु एस्य गतं शुद्धं यद्यंगे न तु न स्पृशेत ॥ परस्य १२

स्त्रानेभुक्षाम स्वाचामविंदवः जानुमात्रेजलेतिष्ठन्नाचमेहिनश्यति ॥ उपविष्टसमाचामेजानुमात्राद्धोजले ॥ ज
लाचांतोजलेशुद्धेहिहि एचमनेवहिः ॥ बहिरंतस्थआचांतःसर्वत्रशुचिरेवतु ॥ जलस्थोजलकार्येषुस्थलस्थःस्थल
कर्मस्तु उभयेषुभयस्थित्लुलाचांतः शुद्धमाप्नुयात् ॥ नजलेशुष्कवस्त्रेणानशुष्केचाद्रेवाससा ॥ आचामादिक्रिपांपोत
कुर्वहिर्जानुनकुत्रचित् ॥ इत्याचमनविधिः ॥ अथदंतधावनविधिः ॥ ॥ प्रातर्भुक्त्वातुशुध्यर्थंकर्तव्यंदंतधावनं ॥ प्राङ्मुख
ईशानाभिमुखोवादक्षिणंबाहुमूर्ध्वस्यांतर्जानुकरमुपविश्यतिक्तकषायकटुकसुगंधिकंटकीक्षीरवृक्षगुल्मलता
दीनामेकेनप्रक्षालितेनवाग्यतोदंतान्धावयेत ॥ तत्रवृक्षस्यकाष्ठंस्यादग्रपर्णैकृजकीटाग्रमहर्षितेद्वादशांगुलमष्टांगुलंवा
कनिष्ठिकाग्रसमस्थूलपर्वार्धकृतकूर्चकं ॥ दंतधावनेखजिह्वोल्लेनिकातथा ॥ क्षत्रादिषंगुलांगुलह्रासः ॥ स्त्रीणांचतुरं
गुलस्वैंषांचैकं ॥ आयुर्बलंयशोवर्चःप्रजाःपशुवसूनिच ॥ ब्रह्मप्रज्ञांचमेधांचत्वन्नोधेहिवनस्पते ॥ इतिदंतधावनमं
त्रः ॥ प्रक्षाल्यभुंक्त्वोत्सृजेत् ॥ तत्रखदिरकरंजकरवीरकुटजासनर्कसर्जापिमेपामार्गमालतीबिल्वाम्रकदंबदारांजवं
जिविणुङ्क्षमोषककवरकपलाशशाकवृक्षस्त्रिखंडीप्रिपंगुतमालाःप्रशस्ताः ॥ शाल्मल्यरिष्ठभपकिंशुकपीलुबिभीत
कगुग्गुलुकुपित्थकुंबष्टतिंदुमधुअगुडकदेतुरपाभल्लात्मिकाश्चवर्ज्याः ॥ इष्टकालोष्ठपाषाणैर्नकुर्याद्दंतधावनंदधि
नीवांधवामोवाकदंबेंगुदतिंदुकाः ॥ बधकमल्लिकाराजकापोसाश्रीहएस्तथा ॥ औदुंबरखदिरक्रमुकशिंशुपाम्वस्याशि

स्म॰मा॰ ल्युभिः॥ कुशकाशैर्दंतशुद्धौ गोपत्रर्पणं नाम यथाशुचिः॥ कोविदारशमीकाचस्त्रेष्मांतकफलशाकाः निर्गुंडीशिंशुपाश्लोककदं
१३ बाकुटजाश्ववटाः॥ विहितप्रतिषिद्धास्फारिमेतस्माद्दिकल्पिताः॥ पालाशाकुसुमंकाशांशिंशपाकार्पासंमदयंतीशाल्मलीतिशि
13 रीषत्रशमीलक्ष्मणां करंजवटार्कबकुलंपारिजातं निर्गुंडीसूचिमुखंकंटकीनश्च पूतिगंधोग्रगंधमधुरविदलंबिल्ववेवि
षदिग्धमूर्ध्वशुष्कं च वर्जयेत इत्येके॥ आसनेशयनेपानेपादुकदंतधावने॥ पालाशाश्वत्थकौवर्जौ सर्वेकुत्सितकर्मसु॥ श्रा
द्धपत्रे च निपमेपसो च प्रोषिते तथा॥ अजीर्णे च विवाहे च उपवासव्रतेषु च॥ प्रतिपद्दर्शषष्ठीषु नवम्यां च विशेषतः दंत
काष्ठवर्जं॥ अष्टम्यां च चतुर्दश्यां पौर्णमास्यां स्त्री दंतकाष्ठतैलानि वर्ज्यानि अर्कवारव्यतीपातजन्मदिनसंक्रांतिनंदादिषु
विशेषतः॥ षष्ठी प्रतिपदोभूता अष्टमी पर्वसु विशेषतो दर्शे नवम्यां च तैलाभ्यंगं क्षिपं मांसं दंतकाष्ठं वर्जयेत॥ दंतका
ष्ठालाभे व प्रतिनिषिद्धदिने च अपां द्वादशगंडूषैर्मुखशुद्धिः पह्नात्तृणपर्णोदकेनां गुल्यावादे तान धावयेत॥ प्रदेशिनी
वर्जं॥ मध्यमानामिकांगुष्ठैर्दंतधावनं भावत्यपि इति दंतधावनविधिः॥ ॥ अथ स्नानविधिः॥ ॥ संशोध्यदंतानाचम्यावि
धिवत्स्नानमारभेत॥ स्नानमूलाक्रियाः सर्वाः श्रुतिस्मृत्युदिताः नृणां॥ अस्नातस्तु पुमानार्होजपहोमादिकर्मसु॥ गुणादश
स्नानपरस्यसंतु तो रूपं च तेजश्च बलं च शौचं॥ आयुष्यमारोग्यमलोलुपत्वं दुःस्वप्रघातश्च तपश्च मेधा॥ स्नानेनात्मप्रसा स्म॰
दस्साद्देवा अभिमुखाः सेद॥ भाग्यश्री सुखंपुष्टिः पुण्यं विघाप्रशोधृतिः॥ महापापापल लक्ष्मीश्चडरितं डविचिंतितं॥ १३

ग्गो कण्ठस्नानादि हरणं प्रातःस्नाने विशेषतः ॥ प्रातर्मध्यान्हयोः स्नानं वानप्रस्थगृहस्थयोः ॥ यतेस्त्रिषवणं स्नानं सकृत्तु ब्रह्मचारि-
णः ॥ सर्वे वापि सकृत्कुर्युरशक्तौ वा दकं विना ॥ स्नाने च सर्ववर्णानां कार्यं शौचपुरःसरं ॥ समंत्रकं द्विजानां स्यात्स्त्रीशूद्र॥
णाममंत्रकं ॥ नमस्कारेण मंत्रेण स्त्रीशूद्राणां तु क्रियाः स्मृताः ॥ न जले शुष्कवस्त्रेण स्थले चैवार्द्रवाससा ॥ तर्पणाचमनं जाप्यमा-
र्जनादिकमाचरेत् ॥ ब्रह्मस्नाने न स्पर्शोर्ध्वं न पोत्सर्जनतर्पणे ॥ जलेषि होमा शुष्केण जले कुर्वन्नडप्यति ॥ स्नानं चाद्विविधं प्रो-
क्तं वारुणेतरभेदतः ॥ तत्रापि वारुणं मुख्यं इतरद्गौण एव तु ॥ आग्नेयं वारुणं ब्राह्म्यं वायव्यं दिव्यमेव च ॥ सारस्वतमिति स्नानं
स्मृतं षोढैव तत्र तु ॥ आग्नेयं भस्मना स्नानमद्भिर्वारुणमुच्यते आपोहिष्ठामयं ब्राह्म्यं मंत्रस्नानं च तत्स्मृतं ॥ पश्चोर्ध्वं चे शाश्र
मार्जनं तमपं तवेकं वक्ता ब्राह्मं हस्ताच्छिरं ततो यं निश्चारसाधारयेदिति ॥ यत्स्मृतं तदपि ब्राह्मं वायव्यं रजसा गवां ॥ दिव्यमात-
पवर्षाद्भि गंगास्नानसमं स्मृतं ॥ विरसा सरस्वती वाचा प्रासे सारस्वतं स्मृतं ॥ दिव्यतीर्थभवं स्नानमुर्वाचार्यैरितं तथा ॥ सर्वतीर्था-
भिषेकात्तु पवित्रं विदुषां हि वाक् ॥ चांडालादिस्पर्शने तु कार्यं वारुणमेव च ॥ काम्यं मलापकर्षं च क्रियास्नानं च वारुणं
दृतणांपि यथा योग्यं देशकालाद्यपेक्षया ॥ स्रोतसोभिमुखः स्नायान्मार्जने चाघमर्षणे ॥ अन्यत्रार्कमुखो रात्रौ प्राङ्मुखोदं-
ङ्मुखोपि वा ॥ संध्यामुखस्तु संध्यायां तथैवाद्येत्पामयोः ॥ नित्यं नैमित्तिकं काम्यं क्रियांगं मलकर्षणं ॥ क्रियास्नानं यथा षष्ठ-
षोढा स्नानं प्रकीर्तितं ॥ नित्यमेव तु मध्यान्हे प्रातस्त्वेकं च कस्यचित् ॥ यतीव्रतीब्रह्मचारी होत्रमध्ये तु तपस्विनां ॥ उच्छि-

स्मृ॰सा॰ षाधुपघातेषु चाप्यस्पर्शनेषु च॥ पग्रहसंक्रमणादौ वस्त्रानं नैमित्तिकं स्मृतं॥ पुष्पस्नानादिकं काम्यं दैवज्ञविधिचोदि
१४ तं॥ इष्टापूर्तिक्रियार्थं य तत्क्रियांगस्नानमुच्यते॥ मलापकर्षणंपतत्त॥ स्नानमभ्यंगपूर्वकं॥ स्नानमेव फलं तीर्थे क्रि
यास्नाने ऽच्यते स्नानार्हो त्ववगाह्यैव स्नाचम्य स्नानमाचरेत्॥ प्रक्षाल्योच्छिष्टमुच्छिष्टं तथैव स्नानमाचरेत्॥ नाला
भसि शिरो मज्जेनावगाहेत्सुमुद्रके॥ क्रियास्नाने शिरो मज्जेदन्यत्रापि सरित्सु च॥ उदयात्पूर्वमूर्ध्वं वा स्नानं स्यात्संगवे
पि वा॥ प्रातः संक्षेपितः स्नाने होमाद्यर्थं तदिष्यते॥ नदीसरिद्देवखातगर्तप्रस्रवणेषु च॥ सरःकृत्वाकृत्रिमेषु स्नानं तीर्थे वि
शेषतः॥ वाप्यां कूपे तडागे वा पारक्ये चोष्णवारिणि॥ प्रातः स्नानं सदा कुर्याद् दृष्टेनैव सदा तु ए॥ तत्र पादौ मुखं च प्रक्षा
ल्य प्र णावं सावित्रीं च स्मृत्वा शिखां बध्वा चम्य ततः प्रक्षाल्य दर्भादीं त्रिधा पदर्भपाणिः कृतसंकल्पो जलेनत्वां प्रांजलिः
प्राङ्मुखं अवगाह्य कयादीनि मन्त्रपस्नात्वा हि एचम्य दर्भपाणिरापोहिष्ठा घैरब्दैवतैर्माजनं कृत्वा जलालोडनं कृत्वा अ
घमर्षणं कुर्यान वा पुनः स्नात्वा हि एचम्य जलतर्पणं कार्यं न वा॥ ततो वस्त्रं प्रांतं निःपीड्याप्य स्पृष्ट्वा वस्त्रद्वयं परिधानोत्त
रीयं धृत्वा स्नानवस्त्रं निष्पीड्याचम्य संध्यामुपासीत॥ मध्यान्हस्नाने त्वयं विशेषः॥ कार्यं मध्यान्हिके स्नाने संक्षिप्तं वा
पि विस्तृतं॥ संक्षिप्तस्य प्रयोगोत्र वक्ष्यते स्मृतिसंग्रहात्॥ तत्र कृतशौचो द्विराचम्य विष्णुं शिवं स्मृत्वा पंचपद्देवतां नवा राम॰
प्रक्षालितततटे मृत्तिकां दर्भान्नक्षतां स्तंडुलान्तिलानपृथक्संस्थाप्य॥ मृत्तिकां त्रेधा विभज्य भागेनैकेन ललाभे र १४

धःसंलिप्यप्रक्षाल्यस्नात्वाद्विराचम्यभूर्भुवस्स्वरितिमृत्तिकांप्रोक्ष्यहस्ताभ्यांतत्सवितुर्वरेण्यमितित्रिरूर्ध्वोपदर्श्यहृत्वाना
भेरधःस्योनापृथिवीभवेतिवापृथिवीत्वांतेतिवालिप्यान्यभागेरूर्ध्वंपदर्श्यतेनाभेरूर्ध्वंगेधद्वाराणिसालिप्यआपोअस्मा
न्मातरः॥इदमापःप्रवहतसुमित्रानआपइतित्रिरस्याभ्यस्पृदुर्मित्रास्तस्मैसंत्वितिबहिःप्रक्षिप्यआपोअस्मान्हृविपेववपेद्वि
ष्यइतिमन्त्रंप्रसन्नस्यअन्यतीर्थेगंगादितीर्थस्मृत्वाहिरण्यशृंगमितिवरुणंनत्वातीर्थचतुर्हस्तंप्रक्षाल्यप्रदक्षिणमुदक
मावर्तयेत्॥जानुमात्रेजलेतिष्ठेदन्त्रोपवित्रोत्स्नात्वादेहंप्रक्षाल्यपुनस्नात्वाद्विराचम्यादैवतेवाह्यपोःसुभःसुवि
त्सवित्रंलिंगैमार्जनंकृत्वाइमंमेगंगेइतिजलेत्रिरालोडयनिमग्नोघमर्षणंकुर्यात्॥तच्चाघमर्षणंअंगुष्ठांगुलिभिःश्रोत्रेद
ग्नासामुखंपिधायनिमग्नस्त्रीषडष्टदशद्वादशवावर्तयेदघमर्षणं॥कृतंचेत्यृक्त्वंसतंद्रुपदांवाजपेदृचं॥ओंकारंवा
जपेद्विस्तुविन्वंसृपंजपेत्तथा॥ततस्त्रीपंचसप्तदशद्वादशवारंवाऽप्सुसहिराचम्यादैवासासाजलतर्पणंकुर्यात्॥ततोजलाद्
तीर्यस्नानवस्त्रमात्रंतत्तरेनिष्पीडयेत्॥एकेवास्मत्कुलेजानातइति॥ततस्नानार्द्रवस्त्रंसत्वकासुकुंसुक्ष्ममहतंकार्पासंक्षौमंवा
श्वेतंजानुकेवावस्त्रंपरिधत्वाजंघेपादौप्रक्षाल्यद्विराचम्यगंगादिमृत्तिकयोर्ध्वपुंड्रंकुर्यात्॥॥इतिस्नानविधिः॥छ॥अथ
नित्यब्रह्मयज्ञतर्पणंकुर्यात्॥तत्रतर्पणविधिः॥अन्वारब्धेनसव्येनदक्षिणेनतुपाणिना॥घमोत्तएभ्यांपाणिभ्यामयवातर्पे

स्म॰सा॰ णं भवेत् ॥ श्राद्धे पिंडे विवाहे च दाने चैकेन दीयते ॥ तर्पणे तु भयेनैव जलं देयं तु नान्यथा ॥ वामहस्ते तिलान्क्षिप्त्वा जलमध्ये तु तर्पये
१५ त् ॥ स्थले चैवाथ ताम्रे पात्रे वा मृन्मये न कुत्रचित् ॥ असंस्कृतप्रमीतानां स्थले दद्याज्जलांजलीन् ॥ मुक्तैस्तिलैर्दर्भैर्देवानुपवीती देवती
15 र्थेन प्राङ्मुखस्तर्पयेत् ॥ शबलैस्तिलैः ऋषीन् निवीती कायेनोदङ्मुखस्तर्पयेत् ॥ आचार्यान्पितॄन् प्राचीनावीती पित्र्येन तीर्थेन कृ
ष्णैस्तिलैर्दक्षिणामुखस्तर्पयेत् ॥ पद्माप्युक्तो दकैर्देवान्ऋषींश्च पितॄंस्तिलैः सर्वान्वा सव्यैस्तर्पयेत् ॥ पद्मादेवानस्ततैस्तंडुलैः ऋ
षीन् तिलैः पितॄन् देवानामेकैकमंजलीं दद्यात् ॥ ऋषीणां द्वौ द्वौ ॥ पितॄणां त्रीन्त्रीन् दद्यात् ॥ स्वचारश्राद्धे मंत्रैः ॥ पद्मा ॥ ब्र
ह्मादयो ये देवास्तान् देवांस्तर्पयामि ॥ भूर्देवांस्त॰ ॥ भुवर्देवां॰ ॥ स्वर्देवांस्त॰ ॥ भूर्भुवस्स्वर्देवां॰ ॥ कृष्णद्वैपायनादयो ये ऋषयः
स्तान् ऋषीन्स्त॰ ॥ भूर्ऋषीन्स्त॰ ॥ भुवर्ऋषीन्स्त ॥ स्वर्ऋषीं भूर्भुवस्स्वर्ऋषी॰ सोमः पितृमान्यमो अंगिरस्वानग्निष्वात्ताग्निकव्यवा
हनादयो ये पितरः ॥ स्तान्पितॄन्॰ भूः पितॄन्॰ भुवः पितॄन्॰ स्वः पितॄन् भूर्भुवस्स्वः पितॄंस्त॰ ततः पित्रादीन्प्रति पुरुषं तर्पयेत्
पित्रादीन्मात्रादीन् मातामहादीन् मातामह्यादीन् पितृव्यादीन् तत्पत्नीः ज्येष्ठभ्रातॄन् तत्तत्पत्नीः मातुलांस्तत्पत्नीः गुर्वाचार्योपा
ध्यायान् सुहृत्संबंधिबांधवान् श्वशुरदासान्पोषकांश्चान्यान् तच्छिष्यांश्च तत्पत्नीस्तर्पयेत् तिलाभावे स्वर्णरौप्यताम्रदर्भपुत्रोदकैः एम॰
खड्गमौक्तिकहस्तेन वा कार्यं पितृतर्पणं ॥ न केवलेजले नैव कर्तव्यं तिलसंभवे ॥ न जीवत्पितृकः कृष्णैस्तिलैस्तर्पणमाचरे १५

त॥ सप्तम्यां रविवारे च जन्मर्क्षे दिवसेषु च॥ गृहे निषिद्धं तिलैस्तर्पणं तद्बहिर्भवेत्॥ शोभनगृहे शोभनदिने न तिलतर्पणं॥ विवा
हे चोपनयने चौले सति पथ्याक्रमं॥ वर्षमर्द्धं तदर्द्धं वा नेत्येके तिलतर्पणं॥ हस्तौ रस्यां च तन्मासे नेत्येके तिलतर्पणं॥ तिथितीर्
थविशेषे तु कार्यमेते च सर्वदा॥ पिंडान्सपिंडानोद्धृत्य पिंडे विनात्र तु॥ पितृयज्ञेव यज्ञे च गयापादद्वारे वतते॥ गयासां मम
ताहस्तकेचिदाहुः पुण्णगाः॥ वस्त्ररुद्रादित्यरूपाश्च श्राद्धे तर्पयेत्पितॄन् नामगोत्रेण समुच्चार्य तिलैस्तीर्थेषु संयतः॥ दीपो॥
त्सवचतुर्दश्यां कार्यं च यमतर्पणं॥ कृष्णपक्षार चतुर्दश्यां अपि कार्यं सदैव वा॥ यमाय धर्मराजाय मृत्यवे चांतकाय च॥ वैवस्वता
य कालाय सर्वभूतक्षयाय च॥ औदुंबराय दध्नाय नीलाय परमेष्ठिने॥ वृकोदराय चित्राय चित्रगुप्ताय वै नमः॥ चतुर्द
शैते मंत्रास्तु प्रत्येकं तु नमोन्विताः॥ एकैकेन तिलैर्मिश्रांस्त्रीन्दद्याज्जलांजलीन्॥ यावज्जीवकृतं पापं तत्क्षणादेव नश्य
ति यज्ञोपवीतिना कार्यं प्राचीनावीतिनाथवा॥ देवत्वं च पितृत्वं च यमस्यास्ति हि द्विरूपता॥ ततः स्नानवस्त्रं निष्पीडयेत्॥ न त्रिगु
णीकृतं पीडयेत्॥ न जले पीडयेत्॥ न दक्षिणोमुखं प्रसारयेत्॥ स्नात्वार्द्रवस्त्रो विप्रस्त्वेकं त्वा प्राणायामत्रयं कृत्वा पुनः स्नाया
त्॥ नोत्तरीयमधः कुर्यान्नोपर्यधममंबरं॥ न सर्वकक्षपर्यंतं वा परिदध्यात्कदाचन॥ कुतुपे षोपमजिनं योगपट्टोत्तरीयकं॥
यज्ञोपवीतिमन्यद्वाहि गोपयेन्तु भवेदिह॥ स्नात्वा निपीड्य त्वकेयानतांगं भक्तोपमृश्य देत्॥ न वस्त्रे विधुनेच्छ्मंनकेशामवष

नयेत् ॥ स्नातो नो गानिमज्ज्यात् तुस्नान वस्त्रेण सर्वथा ॥ नान्योन्यं प्रघ्नतो मज्ज्यान्न लिंपेत् प्रघ्नतो मिथः ॥ स्नात्वा न शावयेद्तान्नमज्ज्या
हा एस्तामुखे ॥ न रात्रौ मृत्तिकास्नानं नैव भौमार्कवारयोः ॥ संध्ययोर्नैव गोमन्त्रेण शुध्ये गोमयेनिशि ॥ दिवांबुगोशकृन्मंत्रैः शुद्धि
र्निशि पंचभस्मभिः ॥ पंचपिंडांत्रिकुंभवाप्युद्धरेत्परवारिषु स्नायादसस्फपहते निस्सार्य्ये न महानिशि ॥ महानिशा द्वे घटिके रा
त्रौ मध्यामयामयोः ॥ न महानिशि निस्सार्य्यं काम्यं नैमित्तिकं भवेत् ॥ स्नायात् नु पर्व महातो निरश्पुष्पेन जलेन च ॥ अस्पृश्यस्पर्श
ने स्नानं निरश्पुष्पेन जलेन च ॥ नाबुहंस्यान्नानिंदेंनत्तीर्थेतीर्थांतरं स्मरेत् ॥ नस्नां पाडुस्त्संवेतीतेमागत्स्ये विनिवर्सेच ॥ अनुक्रमं
स्कन्दहन्नवेदृत्त्वेष देवतां ॥ मृते जन्मर्क्षदिवसे प्रत्तिपन्नवमीषु च ॥ श्राद्धकर्त्तामवादिने संक्रांतिग्रहणेषु च पातेर्कवारेस
सप्तम्यां चतुर्दश्यष्टमीषु च ॥ एकादश्यां पौर्णमास्यां षष्ठ्यां दर्शे विशेषतः ॥ तैलाभ्यंगं रतिं मांसं दंतकाष्ठं च वर्जयेत् ॥ उष्णोद
केन न स्नायात् अन्यदा वाप्यकारणात् ॥ क्रियास्नानं च काम्यं च पारक्यौष्णेन वर्जयेत् ॥ न घोनास्तमिते स्नायात् विशेषान्मध्यया
मयोः ॥ अग्निं प्रज्वाल्य वा स्नायाद्ध्रष्मादिषु महीतले ॥ ग्रहोदर्शेन संक्रांतिविवाहोत्क्रांतिहृष्टिषु ॥ स्नानदानादिकं कार्यं नि
शि काम्यव्रतादिषु ॥ न घोष्णात्वो नदी चान्यो न प्रशंसेच धर्मवित् ॥ अस्पृश्यस्पर्शने स्नाने नाघमर्षणतर्पणे ॥ उष्णावाप्यशु एम॰
चिस्नातौ दंपती मिथुनं गतौ ॥ शयनादुत्थितानारी शुचिः स्यादशुचिः पुमान् ॥ ऋतौ तु मिथुने स्नायाद्गर्भधारणशंकया ॥ अ १६

ऋतौ तद्भावाच्च शौचमत्र पुरीषवत्॥ एगेषु पट्टजस्त्रीणां नत्ते नास्पृश्यपः स्मृताः॥ चांडालादिस्पर्शनादौ विस्तर एव स्मृतेः पृथ
क्॥ शावानुगमनेः स्नापोद्दृतेः प्रायश्चो विकाल्पितः॥ पत्रपृष्ठः स चैलस्नातः स्नानं तत्र प्रकाशिनी॥ कुर्वीत वा शिरःस्नानं त्रिरेण्डे
गीजटी सदा॥ अशक्तौ शोभन मस्पृहे शोभनमाहे च सर्वदा॥ नक्षीतलजलस्नानं कार्यं नैवोष्णसेविना॥ उष्णतेजलस्नाने मार्जनेका
र्पेऽघमर्षणजपोस्ति वा न वा॥ जलतर्पणकार्यं न वा॥ स्थलेतर्पणं तु पात्रस्थे जले क्षितादीन् क्षिप्त्वा पात्रांतरे कार्यं॥ सोदके गर्ते
वा सद्बहिर्भूस्थले वा कार्यं निबर्हिं विना स्थचौ स्थले कार्यं अथाभ्यंगविधिः॥ तैलाभ्यंगे निषिद्धाः स्युः सर्वा प्रतिपत् सदा॥ हूती
यां वर्जयित्वैव दृष्टादृष्टहि दोषतः॥ सर्षपं गंधतैलं च यत्तैलं पुष्पवासितं॥ अन्यद्रव्ययुतं तैलं न दुष्यति कदाचन॥ तैलाभ्यंगनिषे
धे तु तिलतैलं निषिध्यते॥ अभ्यंगस्य निषेधस्तु पार्षपादेः प्रदीप्यते॥ स्नेहाभ्यंगो भवति वस्त्रस्नेहः पार्षपादिकः॥ न भोजनादौ
तैलस्य निषेधोऽभ्यंग एव सः॥ तैलशब्दो तिलस्नेहे रूढः ह्यो नैव योगिकः॥ अतस्तिलविकारेपि पिण्यकतिलमोदके॥ षष्कुली
ह्याहृदौ च निषेधो नैव जायते॥ सर्षपादौ तिलशब्दस्तत्कार्ये सदृशत्वतः॥ स तापकोक्तिस्त्यापुः धेने निर्धनताभवेत्॥ आ
नाऐंग्यं सर्वकामावारे ह्यभ्यंगकारिणाः॥ अस्त्रोभागपंचैवैधसेवारपोर्गुरुस्सुतक्रमोः॥ निषिद्धदिवसे वारे पत्रौ च व्याधितस्य च॥
द्रव्यांतरयुतं तैलं न दुष्यति कदाचन॥ शिरःस्नानतस्तु तैलेन नांगं किंचिदपस्पृशेत्॥ सर्वथा नित्यकामार्थस्नापादेव कार्यं व

स्म॰सा॰ न॥ विनामस्तिकपावापीसकृदुष्णेनवारिणा॥ इतिस्नानविधिः॥ अथसंध्याविधिः॥ संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु॥ यत्किं
१७ चित्कुरुते कर्म न तस्य फलमश्नुते॥ तत्र पादौ हस्तौ प्रक्षाल्याद्भिराचम्य सदर्भपाणिरापोहिष्ठाद्यैस्त्र्यब्दैवतैर्मंत्रैर्दर्भैः शिरसि मार्जनं कृ
17 त्वात्मानं परिषिंच्य सर्षपैश्चेत्यापः पीत्वाद्विराचमेत्॥ सायंकालेऽग्निश्चेत्यापः पिबेत्॥ द्विराचम्याब्दैवतैर्मार्जनं कृत्वात्मानं परि
षिच्य गायत्र्याभिमंत्रितं तोयमंजलिना सूर्यायार्घ्यं त्रिरुत्क्षिपेत्॥ अशुचिदेशे चापांबुमार्जनं परिवर्जयेत्॥ पात्रस्थेनांबुनां कु
र्यान्महस्तस्थितेन वा॥ ततः प्राणायामत्रयं कृत्वा आसूर्यदर्शनात्तिष्ठन् प्राङ्मुखो गायत्रीं जपेत्॥ अनक्षत्रदर्शनाद्वासीनः सायं प्र
त्यङ्मुखो जपेत्॥ ब्रह्मचारी गृहस्थश्चाष्टोत्तरं जपेत्॥ वानप्रस्थो यतिश्चैव सहस्रादधिकं जपेत्॥ पह्नापत्सं जपेद्वीमथवा
विंशतिमथवा॥ सदर्भपाणिना होमादर्भस्थश्च कसंख्यया हस्तेनावर्तयेद्वीमश्च सूत्रैरथापि वा॥ सौवर्णैस्तजतैस्ताम्रैःस्फटिकै
रब्जैस्तथा॥ अरिष्टैः पुत्रजीवोत्थैरिंद्राक्षैः शंखसंभवैः॥ रुद्राक्षैरपि पद्माक्षैः कुशाग्रग्रंथिभिरेव वा॥ मणिभिस्त्वक्षसूत्रं स्यात
दष्टश्रातसंख्यया॥ चतुःपंचाशता वापि सप्तविंशतिभिस्तु वा॥ ओष्ठमात्रिपादपांशुः स्याद्धेयो वैमानसः स्मृतः॥ सउपांशुजपो
ग्राव्यश्वलजिह्वारदच्छदः मानसस्त्वचलजिह्वादशनच्छददरिनः॥ नाधोबर्लिर्नो न चव्यस्तमनापल्कः॥ जपेन्नमोष्ठपादश्च ग एम॰
वषव्कोलसोऽशुचिः॥ न चक्रामन्न जल्पंश्च न पार्श्वमवलोकयन्॥ नासंख्यातमदर्भश्च न शिखाकच्छबंधनः मनःसंहरणं १७

शौचं मौनं मंत्रार्थचिंतितं ॥ अव्यग्रत्वमनिर्वेदो जपसंपत्तिहेतवः ॥ जपांते प्रातः सौरैर्मंत्रैः सूर्यमुपतिष्ठेत ॥ सायं वारुणैः ॥
होमपक्षे पंनजातवेदसेन वैष्णवैः रौद्रैर्वा उपतिष्ठेत ॥ दिग्भ्यो दिग्देवताभ्यो नमस्कृत्य संध्यायै सावित्र्यै गायत्र्यै सरस्वत्यै सर्वा
भ्यो देवताभ्यो नमस्कुर्यात् इत्यादि यथास्वाचारं कार्यं ॥ पुनः सूर्यं नमस्कृत्य सनामगोत्रेण वाग्यतः ॥ गुरुमग्रं बुध्वीत्वाथ होमं कु
र्याद्यथाविधिः ॥ इति संध्योपासनविधिः ॥ अथ होमविधिः ॥ होमे मुख्यो यजमानपत्नी पुत्रश्च कन्यका ॥ ऋत्विक् शिष्यो गु
रुर्भ्राता भागिनेयः सुतापतिः ॥ एतैरेव हुतं यत्तु तद्धुतं स्वयमेव तु ॥ पर्युक्षणवर्जं पत्नी जुहुयात् ॥ कुमारी च ॥ असमक्षं तु दंप
त्योर्होतव्यं नर्त्विगादिना ॥ द्वयोरप्यसमक्षं वै द्वैधं हुतमनर्थकं ॥ संनिधौ यजमानस्योद्देशत्यागकारकः ॥ असंनिधौ तु पत्नी
स्यादुद्देशत्यागकारका ॥ असंनिधौ तु पत्न्याः स्यादध्वर्युर्यजदनुज्ञया ॥ उन्मादे प्रसवे चैतौ कुर्वीतानुज्ञया विना ॥ नोपवासी प्रवा
सेस्या सपत्नीधारयते व्रतं ॥ सर्वथा यजमानो वा त्यजेत द्विपुलः शुचिः ॥ प्रातर्होमे संगवांतः कालस्त्वनुदिते तथा ॥ सायमस्तमिते हो
मकालं नक्तं नवनाडिका ॥ बहुशुष्केंधने वाग्नौ सुसमिद्धे विधूमके ॥ सांगारे लेलिहाने च होतव्यं नान्यथा क्वचित् ॥ अग्निं प्रद
क्षिणावर्तः कर्म दक्षं शुभावहः ॥ अग्निं परिसमुह्य परिस्तीर्य पर्युक्ष्य ततो गंधपुष्पैरलंकृत्य समिधं क्षिप्त्वा प्रादेशसमिधा
प्रांगुलमतिक्रम्य देवतापतने संपूर्णं होम्यं देवतीर्थेन कायेन सौम्यं नवा हुत्वा पुनः समिधं क्षिप्त्वोपस्थाप परिसमुह्य

स्म॰शा॰ पुत्रस्यं कृतयोषं ब्राह्मणाय दत्वा नमेत्॥ पयोदधि पवागव्य आज्य सर्पिरोदनतंडुलाः॥ सोमो मांसं तैलमापो दग्नौ तान्यग्निहोत्रके॥ सादग्नि
१८ होत्रवद्गृह्ये संस्कारे मंत्रे वर्जितः॥ पद्य॥ त्रिः प्रोक्षणं तेषां मांसमौपासनेन च॥ शालिश्यामाकनीवाराः व्रीहिर्गोधूमयावकाः॥ एतेषां तं
14 डुला होम्यापावना लाग्निपंगवां श्रिपंगवः चणलपश्च गोधूमाश्री हृपो पवाः॥ स्वरूपेणापि होम्याः स्युः स्वरूपेणैव वैतिलाः॥ दूर्वेलकवे
णा होतव्यं पाणिना कठिनं हविः॥ व्रीहिणां च यवानां वा नूतमाहुतिरिष्यते॥ तदन्नं द्विगुणं ग्रासो मयूरांडाकृतिस्तथा॥ कुक्कुटांड
प्रमाणं तु पिंडं हूत्यमिधीयते॥ अंगुष्ठपर्वमात्रं स्याद् वदानं ततोपि च॥ आपःस्त्विषकृदाज्यं तु चतुरंगुलसंमितं॥ ग्रासमात्रं भ
वेद्भिक्षा अग्रं ग्रास चतुष्पर्व॥ अग्रं चतुर्गुणीकृत्य हंतकारस्तदुच्यते॥ भिक्षा पुष्कलमग्रं वा पूर्वं पूर्वं चतुर्गुणं॥ भोजनं तद्द्विगु
णं स्याद् एवं पात्रमेव च॥ पद्य॥ धान्यं चतुःषष्ठि एकाहुतिः परिकीर्तितं॥ तंडुलानां तदर्धं स्यात् तदर्धं स्यात् घृतस्य तु॥॥ अथ समिधः॥ पा
लाशः खदिराश्वत्थाम्युदुंबरजाः समित्॥ अपामार्गं चंदनं वांश्च कुशाश्चेत्स परे विदुः॥ सत्वचः समिधः कार्या ऋज्व्यः श्लक्ष्णाः समा
स्तथा॥ शस्ता दशांगुलाः ज्ञात्का द्वादशांगुलकास्तथा॥ अदूपकाः समच्छेदास्तर्जन्यंगुलवर्तुलाः॥ अपाटिताः सहित्वा वक्रिमिदो
षविवर्जिताः॥ दग्धा कृशास्तथाच्छूला ह्रस्वादीर्घास्त्वर्जिताः॥ पद्य॥ समित्सवित्रं वेवा श्वत्रयः प्रादेशासंमिताः पिध्मस्तु द्विगु एम॰
णः कार्या त्रिगुणः परिधिः स्मृताः॥ स्यात्मादेशाद्वर्धो वा द्विगुणः परिधिः स्मृताः॥ अथ दर्भविधिः॥ कुशाः शाकाः पवाद् दूर्वा उशी १८

एश्चैव कुंडएगोधमात्रीहयोमुंजदर्भादर्भाः सबल्वजाः॥नभौमास्सदर्भैस्तु चिर्दर्भान्समाहरेत॥अयातयामास्ते दर्भा नियोज्याःसु
पुनःपुनः॥विरिंचिनासहोत्पन्न परमेष्ठीनिसर्गजैः॥नुदपापानि सर्वाणि दर्भःस्वस्तिकरो मम॥कुशदर्भोत्पाटनमंत्रः॥एवं मंत्रं समु
च्चार्य ततः पूर्वोत्तरमुखः॥हुंफट्कारेण मंत्रेण सकृच्छित्वा समुद्धरेत॥अच्छिन्नाग्रो अप्युष्काग्राःपित्र्ये तु सहिता शुभाः॥अमुला
देवकार्ये तु सपोज्याश्च जपादिषु॥सप्तपत्राः कुशाः शस्ताः दैवपित्र्ये च कर्मणि॥अनंतरगर्भिणौ ग्रौ साग्रौ प्रादेशौ तु पवित्रके॥चतुर्भि
दर्भपिंजूलैर्ब्राह्मणस्य पवित्रकं॥एकैकन्यूनमुद्दिष्टं वर्णे वर्णे यथाक्रमं॥सर्वेषां वा भवेद्द्वाभ्यां पवित्रं ग्रंथितेन वा॥त्रिभिः शां
तिके कार्ये पौष्टिके पंचभिस्तथा॥चतुर्भिश्चाभिचारे स्यांष्ठुरेहूति केचन॥सपवित्रः सदर्भो वा कर्मांगाचमनं चरेत॥नोच्छिष्टं तद्भवे
त्सपं भुक्त्वोच्छिष्टं तु वर्जयेत॥पैःकृतैःपिंडनिर्वापश्राद्धं च पितृतर्पणं॥विण्मूत्रादिषु ये दर्भाः तेषां त्यागो विधीयते॥निविम
ध्ये छिन्नास्तासाजापद्ममूलोच्छिन्नास्तथा॥वामहस्ते स्थिते दर्भे न पिबेद्दक्षिणेन तु॥वस्त्रादिनोपग्रहणेन दोषःपिबतो भवेत॥नब्रह्मग्रं
थिनाचरेत्तन पूर्वाभिः कदाचन॥स्नाने दाने जपे होमे स्वाध्याये पितृतर्पणे॥सपवित्रौ सदर्भौ वा करौ कुर्वीत नान्यथा॥कुशाभावे
तु काशाः स्युः काशाः कुशसमाः स्मृताः॥काशाभावे गृहीतव्या अन्ये दर्भा यथोचिताः॥नार्द्रान्लुनीयाद्दर्भांस्तु लुनीयाद्यापि संध्ययोः॥द
र्भाभावे स्वर्णरौप्यःताम्रैः स्तैः क्रियाचरेत॥इति दर्भोच्चयविधिः॥अथबर्हिः॥बर्हिःकुशमयं ग्राह्यं नलभ्यंते कुशा यदि रणैवर्मुन

स्म॰सा॰ वाश्वैवन्न्याया मुञ्जार्जुनेक्षवः॥ सुगंधितेजना दार्वेहर्वा सीरकुमा अपि॥ पद्मा सर्वतणेभ्योपि ग्राह्या बर्हिर्यथेप्सितं॥ शुकशुंठक
१९ स्तात् लडर्गंधितृणवर्जितं॥ मुलाकने रकोश्वैनावर्ज्य यत्नतस्तरे बुधाः॥ कुशाभावे परे ग्राह्य पर्णवल्लसदौषधिः॥ बंधकस्तकरैकंद
15 परिवाधकवर्जिताः॥ मुख्योन्दर्भा विशेषेण केचित्काशान् कुशान् शएन्॥ वल्वजा नपुंडरीका नीपवन्नीहितृणान्यपि इति
बर्हिः॥ अथेध्मः॥ पालाशः खादिरो वेध्मो मुख्यस्यात् तदलाभतः॥ शमीवटोदुंबरजा अश्वत्थास्तदलाभतः॥ वंनसतीनां सर्वेषां
मिध्मः कार्यो विशेषतः॥ तत्रैतान् वर्जहृक्षान् कोविदारविभीतकौ कपित्थामलकं एजवृक्षं शाकटुमं तथा नीपं निबं करंजं
च तिलकं शाल्मलीमपि॥ श्लेष्मांतकमपि त्यक्त्वा ग्राह्योन्य एककलोद्रुमाः॥ अथ स्रुगादि॥ वैकंकती वा पालाशी वाग्निहोत्रे हैव
ण्पथ। जुहूः पालाशः स्फ्यः प्रदाश्वत्थी वैकंकती ध्रुवा॥ यद्वा सर्वा स्रुचः कार्या एतेषामन्यवृक्षजाः॥ शमीमप्यः स्रुचः सर्वा सर्वा वा
भूर्जवृक्षकाः॥ तदभावे यथालाभमन्ययज्ञियवृक्षजाः॥ खादिरः स्यात् स्रुवस्य श्च शम्या प्राशित्रमेक्षणे॥ खादिरो मुशलः का
र्ष्ठ्य पालाशः स्यादुलूखलं॥ यद्वोभौ वारुणौ कार्यौ तदभावोन्यवृक्षजौ॥ पालाशाहाववटाहान्यवृक्षाह्वा च समाः स्मृताः॥ अश्वसं
वारुणो नो चेदिडापात्रमहान्यजं॥ मुख्याभावे तु संदर्शं द्रव्यं प्रतिनिधीयते॥ यावद्यावत्स्वरूपं दृष्टं तत्तदेव हि गृह्यते॥ काम्ये प्रति एम॰
निधिर्नास्ति नित्यनैमित्तके हि सः॥ काम्येप्युपक्रमादूर्ध्वमन्ये प्रतिनिधिं विदुः॥ नस्यात्प्रतिनिधिर्मंत्रस्वामिदेवाग्निकर्मसु॥ १९

सदेशकालरूपो नास्ति अरणेरग्निरेव स ॥ समां हृत्वा च समिधमरणीं ब्रुवते बुधाः ॥ नाभावस्य प्रतिनिधिरभावांतरमिष्यते ॥ ना
पि प्रतिनिधातव्यं निषिद्धं वस्तु कुत्रचित् ॥ श्रोत्रियाणामभोज्यं पद्मं हि तद्दोषतः ॥ ग्राह्यं प्रतिनिधित्वेन होमकार्ये त्र कुत्रवि
त् द्रव्यं वैकल्पिकं किंच यत्र स्यात्कल्पितं भवेत् ॥ तदभावे सदृक् ग्राह्यं न तु वैकल्पिकांतरं ॥ मुख्यद्रव्यापवादे तु प्रतिनिधिमभिसंधि
ना ॥ प्रयुंजानस्य मुख्यार्थलाभे ग्राह्यः स एव हि ॥ उपांते तु प्रतिनिधौ मुख्यार्थो लभ्यते यदि ॥ तत्र मुख्यमनादृत्य गौणेनैव समा
पयेत् ॥ उपांते पश्चिन्कस्मिन्वा मुख्योपचरिते सति ॥ अन्यद्द्रव्यं सजातीयं विजातीयमथापि वा ॥ उपादाय प्रयुंजानो यदि पश्चान्म
वाप्नुयात् ॥ उपांते त्वा विशेषेपि पूर्वं हित्वा परं श्रयेत् ॥ मुख्याभावे यदा गौणामुपात्तं स हि नश्यति ॥ तत्र मुख्योपमं गौणं ग्राह्यं गौणोप
मेन तु ॥ संस्काराणामयोग्योपि मुख्य एव हि गृह्यते ॥ न तु संस्कारयोग्योप्यगृह्यते प्रतिरूपकः ॥ मुख्ये कार्यासमर्थे तु लब्धे प्रेतस्य
नारदः ॥ प्रतिरूपमुपादाय पश्चात्कं तेन प्रयुज्यते ॥ अवतमासपर्याप्तमुख्यद्रव्यस्य संभवे ॥ पुरोडाशमहत्वार्थं नीवारपरिग्रहः ॥
कृष्णव्रीह्यादिके द्रव्ये शिष्टे पचरिते सति ॥ ग्राह्यो ह्यलोपि सव्रीहिर्नाव्रीहीः कृष्णगुण्यपि ॥ कार्यैरूपैस्तथा पर्वैः क्षीरैः पुष्पैः फ
लैरपि ॥ गंधै रसैः सदृग्ग्राह्यं पूर्वाभावे परं परं ॥ व्रीहिर्यवो वा श्यामाको नीवार एवं हविर्भवेत् ॥ वेणुर्यवो करंबो वा कंदमूलफलं जलं
॥ एतेवा हविरेतेषु यथासंभवमाचरेत् ॥ प्रतिनिध्यंतरं सत्येविज्ञेयं हविहिःस्यपे ॥ प्रधानदेवतोद्देशात् संत्यजेत्स्वात्मनन ॥ अ

स्मृ॰सा॰ तोप्यदपिवाग्राह्यंसदृशंधान्यमात्मकं॥नग्राह्यंसर्वथामाषवरकोदारकोद्रवं॥यद्याव्रीहियवामातुषतंडुलयोगिनिस्त्रोषधीःप्र
२० तिग्रयहीयाद्गृणुकोद्रववर्जिताः॥ग्राम्याणांसदृशंग्राम्यमारण्यानामरण्यजं॥यवाभेतुवेगोधूमाःततोवेणुयवादयः॥छंदोगाय
४० ह्यवचनात्क्रतुपाह्यविरित्सपे॥फलेयातियवस्सस्यतत्सत्रमथवाजलं॥यद्यग्निहोत्रहोमार्थयायोनस्याकदाचन॥तदाव्रीहिय
वौग्राह्यौऔषधंतरमेवच॥अरण्यौषध्ययोहृस्सफलाभ्यायद्वतिक्रमात्॥होमंकर्तुमुपादेयंपूर्वाभावेपरंपरं॥तेषाममभावेक्र
तुपात्रूक्ष्यपासत्यमात्मनःगव्यार्थेगोघृतंग्राह्यंतदभावेतुमाहिषं॥आजंवातदलाभेतुसाक्षात्तैलंग्रहिष्यते॥तैलाभावेग्रही
तव्यंतैलंजर्तिलसंभवं॥तदभावेतसीश्लेहःकौसुंभःसर्षपोद्भवः॥वृक्षस्नेहोथवाग्राह्यःपूर्वालाभेपरःपरः॥तदभावेयवव्रीहि
रूपामाकान्यतरोद्भवं॥पिष्टमालोड्यतोयेनघृतार्थेयोजयेत्सुधीः॥वृक्षतैलेषुपुन्नागनिंबैरंडोद्भवंसृजेत्॥यद्यागव्यघृतेछाग
माहिष्यादिघृतंक्रमात्॥तदभावेयवादीनांक्रमात्क्षीरविधीयते॥तदभावेददधिग्राह्यमलाभेतैलमिष्यते॥यत्राज्यमंजना
घर्षनंलभ्येतकथंचन॥तत्रक्षीरघनादस्यसाक्षात्तैलंग्रहितो॥यत्रमुख्यंदधिक्षीरंतत्रापितदलाभतः॥अजोदक्षीरदध्यादित
दाकावेतुगोघृतंमुख्यात्संपदकाग्राह्याकार्यकारणसंततौ॥अतएवघृताभावेपूर्वैदधिततःपयः॥येषांकेषांचिदन्येवाहविषा एम.
मप्यसंभवे॥सर्वत्राज्यमुपादेयंभरद्वाजमुमुख्यकालेपदावरूपकर्मकर्तुंनशानेमतातते गौणकालेपिकर्तव्यंगौणोप्यत्रेदृशोभ २०

वेत॥सायमाहुतिएप्रातरएसायंप्रातरहुती॥कर्तव्यानातिपद्येतेपार्वणंमार्वणांतरएव॥एकमाकेष्टीहिभिश्रेवपवैर्वान्योन्यकाल
तः॥प्रायश्चित्तंपुज्यतेवरूपंतत्वाएग्रयणास्येः॥एवमागामिकार्यस्यमुख्यकालादधस्तनः॥स्वकालादुत्तरेगौणःकालःपर्वसकर्मणः
सर्वत्रगौणकालेषुकर्मचोदितमाचरेत॥प्रायश्चित्तमाहुतिभिर्हुत्वाकर्मसमाचरेत॥मुख्यकालेतुमुख्यंतेतत्साधनंनैवलभ्यते॥
मुख्यकालउपाश्रेयोगौणमप्यस्यसाधनं॥नमुख्यद्रव्यलोभेनगौणकालप्रतीक्षणं॥एकपक्षगतोपावक्षोमेसवोतिपद्यते॥पक्ष
होमविधानातानरूत्वातंतुमंतीजेयेत्तत्स्वकालोर्ध्वतःकाश्चित्तगौणकालोनिरूपितः॥अपकर्षादथान्योपिगौणकालोनिरूप्य
ते॥अनपाव्याधिमानापत्कृतोवाध्वगेतोपिवा॥एष्टस्येशोधनाभावेगुरुगेहेवसंनपि॥अन्येष्वेवंप्रकारेषुनिमित्तेष्वागतेषुच॥समाप्त
मग्निहोत्राणांयथासंभवमाचरेत॥निमित्तानामिहैतेषांनिर्दिश्येकंपद्यते॥तस्य्वैषुनिमित्तेषुजानीयात्प्रतिपादितं॥पक्षहोमान्वशे
षान्वान्शेषहोमान्यथापिवा॥समस्यऊहुयात्तत्रप्रयोगोयंनिरूप्यते॥प्रतिपद्दिश्यवसेत्सायंआपयन्यत्रवादिने॥प्रावंसोपवसथ्याहाद्वा
ग्दिनानिभवंतिहि॥तावंतिपरिगृह्यहीपाच्चतुरंनपनानितु॥पत्रांतरसहापापानित्यापांप्रकृतौश्रुचि॥स्थलेस्थ्यांतेरंवापिहत्वातत्रस
मुंत्रयेत॥एकासमित्सकृत्सोमःसकृद्देवनिमार्जनं॥उपस्थानंसकृत्कार्यंएषांप्रकृतिरिष्यते॥एवमेवोत्तरस्त्रापिप्रातर्होमेतत्समस्यतु॥जु
होत्यौपवसथ्याहःप्रातर्होमानवंधीत्सकृत॥समारोपविधानेनसम्यएपपेतेनलात॥एवंप्रतिपद्योन्यत्रयत्रापदुपजापतेतथैवो

स्म॰हा॰ पव सथ्यात्स्राक पत्राप्याप हि नस्पति॥ अपदेवावधिर्होमे समासस्याम्फपे पत्ते॥ तस्मात्कदाचिद्दाएभ पावतस्तावत्तोपि वा॥ अप्रका
२१ ल समान् होमान् समसेदेकपक्षपात एमेव तत्र पक्षेपे होमाःशेषामग्नो यतः॥ न्यूनानां वा समस्तानां मापत्स्यं न्यूनपक्षान्तरवर्त्तिनो॥ सर्वथोप
५१ वसथ्याहे सापंहोम पृथक् भवेत॥ तथैव पजनीपाहे स्त्रातर्होमौ भवेत्स्पृथक् सपर्वोपवासस्पष्टं चेत्स्रामं केनोपि हेतुना॥ तदा तस्या
यंहोमेपि पर्वैः सह समन्पते॥ तावतो॥ तावतो नापगच्छेच्चेदापसक्षंतरेपि वा॥ पुनःस्तत्रापि कर्तव्य समासः पृथगेव हि॥ न तु पक्षा
तरस्थानां समानश्रेयते मिथः॥ एवमापद्गतः पक्षे पक्षे चैवं समाचरेत॥ न्यूनतापेनंतरे पक्षे समानं समनमाचरेत॥ अपच्चेदनुवर्तेत दीर्घ
कालकथंचन॥ पावज्जीवमविच्छिन्नं पक्षहोमं समाचरेत॥ अपदेवावधिस्तत्र नपक्षगणना विधिः॥ अथापरः समासस्य प्रकारः
प्रतिपाद्यते॥ सापं प्रास्तनौ होमाऽभौ सापं समसस्तु॥ अपतौ जुहुपात तत्र समिदे काप्यकाहवे॥ सापं सोमस्य मुख्यत्वात दीपं तत्र मु॥
स्पते॥ चतस्त्र आहुती कुर्यात तत्र हैसापमाहुती॥ हेमातपाहुतीः सापं होमे देका समिद्यदि॥ समित्कृताहुतीपाचेत त्साभर्वेत्सात एकु
तौ॥ हिः सापं होमवन्मज्यात हिः प्रातर्होमवस्कचं॥ उपस्थानं सत्कृत्वा पर्वणोपे प्रकृतिवद्भवेत॥ केचिद्धेआहुती र्हुत्वा संवेद्यपेव मि
नीत्यवा॥ विच्छिद्यैतावता होमौ कुर्युर्द्वे आहुती ततः॥ गुर्वोपदिसमस्तं ते प्रातः सर्वे कथंचन॥ दीर्घकालार्पदं मत्वा पक्षहोमे कृते एम॰
सति तेत्रांत एलेप चापत कदाचिदपगच्छति॥ काले काले पुनर्होमः कृत्पाग्लाघ्युतानपि पावं तोत्र समस्तं ते सर्वे सापमुपक्रमः २१

प्रातःकालापवर्गश्च न तु मातः प्रक्रमः ॥ प्रातर्होमादिकापद्वा प्रातश्चेदापदागता ॥ तदा पूर्वापराह्णादौ निमित्ते च समस्यति ॥ पूर्वेद्य
श्चौतु रात्रौ चेन्मन्त्रं कार्याग्निहोत्रिणः ॥ सायं हुत्वा तथैवाथ जुहुयात्प्रातराहुतीः ॥ यदि स्यात्पक्षस्यान्तस्तिथिं कार्याग्निहोत्रिणः हुत्वावशे
षाः पक्षेस्मिन् जुहुयात् सकलाहुतीः ॥ दर्शेष्टिं च सदा कुर्यात् द्विपर्वा दि हसंभवेत् ॥ देवतानां प्रधानानामेकैकस्य पृथक् पृथक् ॥ पुरो
नुवाक्यायाज्याभ्यां चतुरवद्यताहुतीः ॥ जुहुयाद्देवमंत्रेण सर्वदापदि हूयते ॥ अथैष्टापनमध्ये स्यात् पत्कर्मणां त्रांकनं ॥ अवशिष्टेषि
दैवेभ्यः सर्वेभ्यो निघ्नतानि च ॥ चतुर्गृहीतान्येकत्र गृहीत्वा च सकृद्धुता ॥ पुरोनुवाक्यायाज्याभिः पूर्ववज्जुहुयात्तथा ॥ चातुर्मास्यान्तरा
ले स्यात् स्वामिनो मृत्युः त्रांकनं ॥ तत्रान्त्यपर्वपर्यन्तमग्निहोत्राण्यशेषतः ॥ तदैव कृत्वा दर्शान् पूर्णमासान् बहूनपि ॥ चातुर्मास्यावशि
ष्टानि पर्वाण्यत्र समापयेत् ॥ पश्वलाभे पुरोडाशं निर्वपेत्पशुदैवतं ॥ आमिक्षामथवा कुर्यात् पूर्णाहुतिमथापि वा आहिताग्निः क
दाचित्तु कृष्णपक्षे मृतो यदि ॥ तदाशेषाहुतिः सर्वा जुहोतीत्याश्वलायनः अन्येत दैवदर्शेष्टिं कुर्युः कृष्णेमृते सदि ॥ शुक्लपक्षे
नित्रिम्रेत सेच्छेति प्रान्तराहुतिः ॥ यआहिताग्नेर्धर्मस्यात्स औपासनिकस्य तु ॥ इति त्र्याप्यापनीकर्माचक्षे आत्मपामंत्रतः ॥ सध्यामि
ष्टिं च हं होमं यावज्जीवं समाचरेत् ॥ न त्यजेत् सूतके वापि त्यजनाच्छेदवो द्विजः ॥ कुर्यात्संच महायज्ञानि त्यत्र्याः सूतिकं विना ॥ नि
त्यं नैमित्तिकं चान्यत्तु कर्मापि न हापयेत् ॥ स्वकर्महानौ पतनमवश्यं नैव त्वमापदि ॥ स्वकर्महानौ नास्तिक्याभासेन पतनं स्व

स्मृ॰सा॰ त॥ द्वादशाहं व्रतेनैव तत्स्पर्शशुध्यथा॥ तं निरीक्ष्यार्कमीसत्रौस्नात्वा तत्र सचेलकं॥ तेन संभाषणं हास्यं कुर्वंतब्देन तत्समं तदन्न
२२ भुक्तौ सद्यस्कृ स्नहसप्यास्तनेषु च॥ इति होमविधिः॥ अथ देवतार्चनविधिः॥ ब्रह्माणं विष्णुमीशानं सूर्यमग्निं गणाधिपं॥ दुर्गां
सरस्वतीं लक्ष्मीं गौरीं वा नित्यमर्चयेत्॥ अप्सु वह्नौ हृदये सूर्ये स्थंडिले प्रतिमासु च॥ शालग्रामे च चक्रांके पटे मुद्रासु देवताः॥ नि
त्यं संति हि रूपेषु रत्नगोब्राह्मणेषु च॥ पौरुषेणैव सूक्तेन गायत्र्या प्रणवेन तु॥ तल्लिंगैरेव वा मंत्रैरर्चयेत्कुर्वनुत्तपा॥ देवतानाम
मभिर्वा स्याच्चतुर्थ्यंतेन मोन्वितैः॥ आवाहनासनं पाद्यमर्घ्यमाचमनीयकं॥ स्नानमाचमनं वस्त्रमाचामं चोपवीतकं॥ आचामं गंध
पुष्पं च धूपं दीपं प्रकल्पयेत्॥ नैवेद्यं पुनराचामं नत्वा स्तुत्वा विसर्जयेत्॥ स्त्रीशूद्राणां चैव भवति नाम्ना वै देवतार्चनं॥ सर्वे वागम
मार्गेण कुर्युर्वेदानुसारिणा॥ गुरुस्तेन प्रकारेण वेदबाह्येन चार्चयेत्॥ यां कांश्चिद्देवतां कश्चित् आराधयितुमिच्छति॥ स सर्वोपा
पपत्वेन ब्राह्मणान्गांश्च तोषयेत्॥ एवं देवार्चनं कृत्वा गुरुं संपूज्य भक्तितः॥ पुष्पं क्षिप्त्वा प्रणम्याथ नित्यदानं स्वशक्तितः॥ कृत्वा
हस्तं नमस्कृत्य कर्तव्यं मंगवेक्षणं॥ विप्राग्न्यर्काबुगोहेमन्दपाज्यं मंगलस्मृतं॥ आम्रविल्वकपिलाश्वत्थी पद्माम्लक्षान्बुधि॥ स्नानपि
शृंदो पः सिद्धः श्रोतापुर्धीमिकः शुचिः॥ एते पापहराश्चैतान्सदा पश्येत्सदापि॥ ऐचनचंदनं हेमम्मदं गंदर्पणं मणिं॥ घृतं वा स्मृ॰
ग्निं गुरुं विप्रं प्रातः पश्येत्सदा बुधः॥ कृष्णलब्राह्मी च दूर्वां च चंदनं गोरोचं पुष्पिकां॥ सिद्धार्थकोप्यिनप्रियंगुं च प्रातः शिरसि धारयेत्॥ २२

पाणिषु दर्भं गं वा धनमनुत्सृजन्नासिकं ॥ प्रातर्नमस्येदेतां स्तुत्वा दृष्ट्वा पश्येद्दिवाकरं चैव ॥ इति देवताविधिः ॥ ॥ अथ मध्याह्नस्नानं कृत्वा
नित्यमासमाध्याह्निकं कार्यं ॥ तत्र पादौ प्रक्षाल्य हस्तौ च आचम्य आपो हि ष्ठा द्यैर्मार्जनं कृत्वाद्भिः परिषिंच्य आपः पुनंतु पृथिवीमिति जलं दर्भ
पाणिः पीत्वा हस्तौ एवमाचम्य पुनः आपो हि ष्ठाद्यैर्मार्जनं कृत्वाद्भिः परिषिंच्य गायत्र्या सह सूर्यायार्घं दत्त्वा प्रदक्षिणीमावृत्य आपः स्पृष्ट्वा हंसः शुचि
षदिति सूर्यमुपस्थाय षोडशं चित्रमित्याद्यैः उपस्थापनं स्वाभिमतं स्पृष्ट्वा प्राणायाममंत्रमेकं गायत्रीं पूर्ववज्जपेत् ॥ पुनः सूर्यं नत्वा ब्रह्म
यज्ञादिकान् कुर्यात् ॥ ब्रह्मयज्ञो देवयज्ञो भूतयज्ञस्ततः परः ॥ पितृयज्ञो नृयज्ञश्च पंचयज्ञाः प्रकीर्तिताः ॥ स्वाध्यायो ब्रह्मयज्ञः स्याद्देव
यज्ञोग्निहोमकः ॥ भूतयज्ञो बलिः प्रोक्तो हुतशेषान्नतर्जनैः ॥ पितृयज्ञः स्वधा पितृभ्य इत्यन्नादिदानं ततः मनुष्ययज्ञोऽतिथ्यादिमनुष्यो
द्देशादानं ततः ॥ अथ ब्रह्मयज्ञं कुर्यात् ॥ तत्र पादौ प्रक्षाल्य हस्तौ आचम्य प्रागग्रेषु दर्भेषु प्राङ्मुख आसीनो दर्भपाणिः पवित्रगर्भब्रह्मांजलिः
प्रणवव्याहृती रुक्त्वा सावित्रीं पच्छोर्धर्चशः कृत्स्नां नवानं चोक्त्वा प्रणवमुक्त्वा ऋचं सूक्तं मनुवाकं वा यजुर्वा सामं वा गायत्रीं चेति हासपु
राणं वा मंत्रेण मध्यमेन स्वरेणावाधीयन नमो ब्रह्मण इति त्रिरुक्त्वा उत्तरसंस्था प्रारभ्यं तत्सदिति समापयेत् ॥ आमेमनसाधीयी
त ॥ ततः स्वशाखोक्तविधिना देवान् ऋषीन् पितृंश्च तर्पयेत् ॥ पद्य ॥ ब्रह्मसादपो ये देवाहूत्याद्यैर्यथा स्वचारं कुर्यात् ॥ ततो वस्त्रं नि
ष्पीड्याचम्यांबु गृहीत्वा गृहं गत्वा वैश्वदेवं कुर्यात् ॥ अथ देवयज्ञः ॥ प्रहस्तौ वैश्वदेवाख्यं कर्म प्रारभते दिवा ॥ अन्नस्य चात्मनः श्रे

स्म॰सा॰ वसंस्कारार्थमिहेष्यते॥औपासनाग्निमन्यंवासमिध्यपरिसमुह्यपर्युक्ष्यास्तृतगंधपुष्पाणिअथदिक्षुचाग्निंचक्षिखालंकृत्यस
२३ हविष्यंपक्वंघृतप्लुतंमंजनाक्तंवापथ्यास्वाहाकारंकृत्वापरिसमुह्यपर्युक्षपेत्॥अथबलिहरणं॥देवयज्ञकृतशेषेणभुविदेश
23 मभ्युक्ष्यतत्रकुर्यात्॥अथपितृयज्ञः॥तत्रभूतयज्ञवलिहरणशेषंसोदकंस्वधापितृभ्यःनमइतिप्राचीनावीतिदद्यात्॥तत
स्तथैवबहिःश्वानेतिसोदकंमंनंभूमौश्वचांडालपतितवायसेभ्यश्चनिक्षिपेत्एतेदेवयज्ञभूतयज्ञपितृयज्ञवैश्वदेवमित्युच्य
ते॥अहविष्यंसमस्तंचवैश्वदेवेविसर्जयेत्॥यद्वाकोद्रवंचणकंमाषंमसुरंचकुलित्थकं॥क्षारंचलवणंसर्वंवैश्वदेवेविव
र्जयेत्॥यद्वानक्षारलवणहोमोवाविधतेतथा॥पर्यन्नसंस्पृष्टस्याहविषस्यवाहोमेऽदीचीनामुस्मभस्मापोह्येतस्मिन्जुहुयात्
तद्भुतमहुतंवाग्नौभवति॥स्त्रीनजुहुयात्यद्वाभस्मांगारेषुजुहुयाद्दहविष्यकं॥अथातःमनुष्ययज्ञंकुर्यात्॥तत्रतिथ्यादी
नर्चयित्वानिवीतिसनकादिमनुष्येभ्योहंतेतिदद्यात्॥यद्वाग्रहंतकारंवाहंतेतिवाहंतंत्यजेत्॥सर्वथान्नपितृमनुमनुष्येभ्यो
देयंचापिजलंतथा॥स्वाहाकारवषट्कारनमस्कारादिवौकसां॥स्वधाकारपितॄणांतुहंतकारोनृणांस्मृतः॥पक्वाभावेप्रवासे
चतंडुलोनौषधिस्तथा॥पयोदधिघृतंवापिकंदमूलफलादिवा॥योजयेद्देवयज्ञादौजलेवापत्रेवाजले॥द्रव्यंलेवणहोतव्यं एम॰
पाणिनाकठिनंहविः॥स्नातकोब्रह्मचारीवाप्ययक्पाकीवैश्वदेवंकुर्यात्स्त्रीबालश्चकारयेत्होमाग्रदानरहितंनभोक्तव्यंक २३

दाचन॥ अविभक्तेषु सर्वेषु एकेनापि कृतं तु यत्॥ देवपश्चादि सर्वार्थे लौकिकाग्नौ कृतं पदि॥ दृष्ट्वा न पः फलं मूलं तांबूलं च पमो
षधं॥ भक्ष्यं दृष्ट्वापि कर्तव्याः स्नानदानादिकाः क्रियाः॥ कुर्यादहरहः श्राद्धं मेनाद्येनोदकेन वा॥ पयोमूलफलैर्वापि श्राद्धान्नं नाति
भक्तितः॥ इति स्मृत्यर्थसारे आचारप्रकरणं समाप्तं॥ छ॥ कामधेनौ मदीये व्योकलहस्तादिषु॥ संक्षिप्तं विकटेदालो
लुवाद्यैश्च भाषितं मन्वत्रिपाज्ञवल्क्यपादैर्व्याख्यातं प्रतिपादितं॥ स्मृत्यर्थसारं वक्ष्यामि सदाचारानुष्ठानसिद्धये॥ छ॥ अथ श्रा
द्धविधिरुच्यते॥ तत्र श्राद्धं द्विविधं॥ पार्वणमेकोद्दिष्टमिति॥ त्र्युद्देशो पार्वणं॥ एकोद्देशो एकोद्दिष्टं॥ तच्च त्रिविधं नित्यं नैमि
त्तिकं काम्यं चेति॥ तत्र नित्यमहरहर्मावास्याष्टकादिषु नैमित्तिकं पुत्रजन्मादिषु॥ काम्यं फलार्थीनां तिथिनक्षत्रादिषु॥ पुन
श्च पंचविधं॥ अहरहः श्राद्धं पार्वणश्राद्धं वृद्धिश्राद्धं एकोद्दिष्टं॥ सपिंडीकरणं चेति तत्र श्राद्धदेशः पुण्यः॥ आह्निके यो
क्तो भ्रादिरहितः शोधितो दक्षिणाप्रवणो गोमयेनोपलिप्तः॥ अथ श्राद्धकालः॥ अमावास्याष्टकावृद्धिकृष्णपक्षोपनद्वयं॥
विषुवत्सूर्यसंक्रमो व्यतीपातो गजच्छाया ग्रहणं युगादिमन्वादयश्च॥ विशिष्टदेशयोगपात्रो विशिष्टकाले च महातिथिहादौ द्रव्य
ब्राह्मणसंपत्तिश्च वा महत् चित्रश्रेत्याद्याः कालाः॥ अथ भोज्या ब्राह्मणाः॥ अभिजानपूर्वश्च क्रताध्ययनसंपन्नो न वानो वेदार्थ
वित् ब्रह्मवित् त्रिमधुस्त्रिसुपर्णस्त्रिणाचिकेतो ज्येष्ठसामगः कालिकपाज्यादिः॥ अथवा दौहित्रो भागिनेयो जामाता मातुलः श्वशु

स्म॰सा॰ रः त्रिष्वसेवं धिवांधवाः॥ कर्मनिष्ठः स्तपोनिष्ठ षडग्निः पंचाग्निः चतुरग्निस्त्रेताग्निरेकाग्निर्वेदाध्यायी ब्रह्मचारी साधाः मृता॥
२८ स्ताः॥ अथ निषिद्धाः॥ रोगी न्यूनांगो तिरिक्तांगः काणो बधिरो नपुंसको पविद्धपंक्त्यो जोरोजारए पतिः स्वलढ्ढ तिर्निजेकलदंतः
५५ कुनखी डश्यवर्मा अवकीर्णि पौनर्भवः कुंडगोलौ निषिद्धाः नाम्नामें द्रुमगान्वीभृताध्यायीभृताध्यापककन्यादूषी चाभिशस्तो
मित्रध्रुक पिशुनः सोमपरपुष्टःक्रयी परिवित्तिः परिवेत्ता तपोदर्शत्रपाज कौ चव्ह थामातपितृकृतभार्या गुरुत्यागी पुनर्भू
पतिः स्तेनः कितवो देवलकः कर्मदुष्टो विहीतत्यागी निषिद्धाः श्राद्धे हीत्याद्या वर्ज्याः॥ अब्रवेत्र प्रयत्नात्तालाभे निषिद्धरहितेभ्यो संनि
सेः श्राद्धे वैश्वदेवं गृहबलिश्च पूर्वमेव॥ दर्शश्राद्धे वैश्वदेवं पश्चाद्॥ वृक्षावादौ सपात्यं तेदर्शेमध्ये महालये॥ श्रा
वान्तेषु प्रकर्तव्यं वैश्वदेवं चतुर्विधं॥ गृहबलिश्च पश्चादेव॥ अन्यश्राद्धे सर्वं पश्चादेव कार्यं॥ अथ अमावास्या पार्वणश्रा
द्धमुच्यते॥ तच्च पितृणां मातामहानां च कार्यं तत्र पूर्वेद्युस्तद्दिने वा नियतो नियतान् ब्राह्मणान् आश्रेक्षपाक्तिपातामिति निमं
त्र्य कार्यं तत्र पूर्वेद्युस्तद्दिने वा नियतो नियतान् ब्राह्मणानुताना ह पच्छागतं स्वधुपाम्सुस्वागतमित्यक्तेदाह कास छिद्रादिवर्जिता
हतश्मश्रुकुश्मश्रुक्षहिव स्त्रोदिए चम्य प्रामुखः कृतगोमयमंडले कुशापवेगंधाघर्चिते वैश्वदेवब्राह्मणपादावुपवीतिः प्राभिमुख स्म॰
प्रक्षाल्य कुशतिलगंधाघर्चिते मंडले पित्र्यर्थब्राह्मणपादान् प्राचीविती प्रक्षाल्य स्वयपद्धि एचांतो हिएचांतानुपवेशयेत्॥ ततः २८

वैश्वदेवार्थंब्राह्मणौप्राङ्मुखौभेदघ्णदाहायःसंबंधवर्जितेश्लक्ष्णाचतुष्पादपीठेनेपीठेनेपालकंवलेवातृणासनेवाऽपवेश्य
श्रीनविमानउदङ्मुखानपिसर्वथमुपवेश्यपेत॥पद्धाएकैकमुभपत्रौपवेश्यपेत॥मातामहीनांचैवं॥तत्रंवावैश्वदेवंस्यातततोगृ
हाद्दहिःकुशानतिलानविकीर्यब्राह्मणसमीपेकुशेषुप्रांङ्मुखःऽपविश्यपुरूषदेवतांगपादेवाचस्वादीनपितृनजनार्दनंचन
त्वाकुतुपादिकालेसमंत्रकामंत्रकप्राणायामहर्यकृत्वाप्राचीवीतिपितृणांपितामहानांप्रपितामहालानांसपत्निकानांमाता
महानांमातुःपितामहानांमातुःप्रपितामहानांसपत्निकानांअमुकगोत्राणांवसुरुद्रादित्यस्वरूपाणांअस्मिनकालेसदेवंपोर्व
णश्राद्धंपुष्पदनुत्तपाकारिष्यइतिसंकल्पअपाहताइत्यऋएइतिसर्वत्रतिलान्विकीर्यउदीरतामित्यचाप्रोक्षयेत॥देवंसर्वमुपवी
तिप्रदक्षिणंपुमत्वपूर्वंउदगग्रमुद्गपवर्गमुदङ्मुखःकुर्यात॥ततोवैश्वदेवार्थविप्रहस्तेआपोदत्वापुमान्कुशानक्रजूना
सनेष्वासनंदक्षिणतोविश्वेषांदेवानामिदमासनमितियवसंहितंक्षिपेतआसनेष्वासंनंदत्वाविप्रहस्तेनकुत्रचित॥ततःपुन
रपोदत्वानिमंत्रयेदेवेक्षणःक्रियतामिति॥ततःओंतथेतिविप्रोब्रूयात॥ततःप्राप्नोतुभगवानइतिकर्ताब्रूयाततोवैश्वदेवःप्रा
प्नवनितिपुनर्विप्रोब्रूयात॥इतिग्रंथसंग्रहकारस्मृतिः॥अक्षैष्पासनपोःषष्ठीद्वितीयावाहयाअंन्नदानेचतुर्थ्यस्याच्छेषासंबु
द्धयःस्मृताः॥इतिश्लोकसंग्रहकारस्मृतिः॥पद्धा॥सर्वत्रेवचतुर्थ्येवप्रयोज्याअवाहनवर्ज्यंसर्वत्रपुनःपुनरपोदत्वाततःपुरू

स्म॰ स्मा॰ ऐवोर्द्दिवान् विश्वान् देवान् आवाहयिष्ये इति पृच्छति। आवाहयेति तैरनुज्ञातो विश्वेदेवास आगत इत्यृचावाहयेत्। यवान् दक्षिणपाणि
२५ दादिमस्तकान्तं समारोप्य विश्वेदेवाः शृणुतेमं हवं मे आगच्छन्तु महाभागा इत्याभ्यां मन्त्राभ्यामुपस्थापयेत्। ततः समीपे भूमौ यवान् विकीर्य
25 कुशानास्तीर्य तत्र स्रुवपर्णादि तैजसाश्ममयमृन्मयपलाशपत्रादेष्वेकद्रव्यपात्रं स्थापयेत्। हि कुशकूर्चं शं नो देवीरभिष्टय इत्यृचा चोत्तरं हिं
ग्रं यो निषिंच्य यवोसि धान्यराजो वा इत्यृचा यवान् क्षिप्त्वा गंधपुष्पाद्यर्घ्यद्रव्यमपि च क्षिपेदिति। निवेद्य विप्रहस्ते कूर्चं साग्रं क्षिप्त्वा
या दिव्या आपः पयसेत्यृचा विश्वेदेवा इदं वो अर्घ्यमिति तद्धस्तेऽर्घ्यं दद्यात्॥ ततो विश्वेदेवा अयं वो गंध इत्यादिमंत्रेण गंधा
दि दद्यात्॥ श्रीखंडकुंकुमकर्पूरागरुपद्मकादिगंधानुलेपनं कर्ता कुर्यात्॥ गंधं दत्त्वा कर्ता दर्भेण पाणिनानुलिंपेत्। स्तेन दर्भेण
हस्तेन निक्षिपेत्॥ ब्राह्मणः स्वयमनुलिंपेत्। स्नानायं नियमः॥ ततो जातिमल्लिकाश्वेतपद्मिकाचंपककुंदजात्यादीनि पुष्पाणि म
रुवकादिषु स्रग्गंधिपत्राणि च देयानि॥ उग्रगंधीन्यगंधीनि ह्रस्वकंटकान्यशुक्लानि सुगंधिकंटकीजानि च अर्कधत्तूरशिवकां
चनारलतुलसीबिल्वादीनि वर्ज्यानि ततो घृतमधुसंयुक्तगुग्गुलश्रीखंडागरुसरलादिसंभवं घृतादि समस्तोऽप्यस्तो वा धूपो
वा देयः॥ पाण्यंगहस्ते वा नाहतं च धूपं वर्जयेत्॥ ततो घृतेन तिलतैलेन वा अनिषिद्धेन स्नानेन दीपं दद्यात्॥ वसामेदोद्भवं व एम॰
र्जयेत्॥ ततः शुक्लं शुक्लमहतं सदशं वस्त्रमाच्छादनं दद्यात्॥ तं न मस्त्वं वा अलाभे उत्तरीयं यज्ञोपवीतं वा शक्त्या दद्यात्॥ ततो वै २५

नमः पूर्णमस्त्विति ब्रूयात् अस्त्विति ते च ब्रूयुः ॥ संकल्पसिद्धिरस्त्विति भवंतो ब्रुवंत्विति कर्ता ब्रूयात् ॥ अस्तु संकल्पसिद्धिरस्त्वि
ति विप्रा ब्रूयुः ॥ आसनादिषु सर्वत्र स्वासनं अस्तु अर्घ्यं स्रुगंधसुपुष्पाणि सुमाल्यं सुधूपः सुदीपः सुज्योतिः स्वाच्छादनमिति विप्राः
प्रतिब्रूयुरिति संग्रहकारस्मृतिः ॥ अथ पित्र्यं ॥ प्राचीनावीती सव्यं दक्षिणामयुग्मत्वं पूर्वं दक्षिणाग्रं दक्षिणापवर्गं दक्षिणामुखः कुर्या
त् पित्र्योपचारे षेकवचनं बहुवचनं वेदवचनेनेवा प्रयोज्यां जपयन्मेषेकवचनमेव पित्र्यविप्रहस्ते अपो दत्वा त्वयुग्मकुशान् द्विगु
णान् सतिलानासने वासनं पितॄणामिदमासनं पितामहानामिदमासनं प्रपितामहानामिदमासनमिति वा आसनं वामभागे दद्यात् ॥
मातामहेष्वेवं ततः श्राद्धे क्षणः क्रियतामित्यादिभिर्मंत्रैः पितॄन् पितामहान् प्रपितामहान् आवाहयिष्य इति तिलहस्तो ब्राह्मणान् पृच्छ्य
पितरं पितामहं प्रपितामहं आवाहयिष्य इति प्रति वा पृच्छ्य आवाहयेति विप्रैरनुज्ञातः उशंतस्त्वेत्यृचावाह्य तिलान् मस्तकादिदक्षि
णपादांतमारोप्य अपयंतु न इति पितरः स्वस्थ प्रतिष्ठेत ॥ मातामहेष्वेवं कृत्वा पितृसमीपे भूमौ तिलाक्षतकीर्णकुशेषु एजतादिपर्वोक्तपा
त्रत्रये त्रिकुशाक्षतांतर्हिते शंनोदेवीरभिष्टयपस्तचापेनिषिंच्य तिलोसि सोमदेवत्य इति तिलान्क्षिप्त्वा स्वधार्घ्य इति निवेद्य विप्रहस्ते कू
र्चेसिक्त्वा या दिव्या आप इत्युक्त्वा पितरिदं ते अर्घ्यं पितामहेदं ते अर्घ्यं प्रपितामहेदं ते अर्घ्यं क्रमेणार्घ्यं दत्वा चतुर्थ्या वा दत्वा तत्सस्तनिर्ग
तार्घ्योदकं पित्रपात्रे प्रसिच्य दक्षिणाग्रेकुशेषु पितृभ्यः स्थानमसीति सपवित्रं न्युब्जं कुर्यात् ॥ तज्जं कृत्वा वा तत्सोपर्यर्घ्यपात्रपवित्रा

स्म॰ सा॰ णि क्षिप्त्वा तिलपुष्पादि क्षिपेषेत्॥ तत्पात्रमासमासेर्नं चालयेत्॥ मातामहेषु चैवं॥ अलाभे एकं पात्रं विपवित्रकं कार्यं॥ ऊर्ध्वं तत्त्वा
२६ पं तु न स्ति लो सि मंत्राणामहोन कार्यं श्च दैवे पित्र्ये च पात्रे निवेदनां ते च अवाहनमिति केचित्॥ ततः पितरः अपं ते गंधः इत्यादिप्र
26 योगेण गंध माल्य सुकुपुष्पाणि दद्यात्॥ ललाटे पुंड्राकारं स्कंधे मालां च वर्जयेत्॥ धूपं दीपं च जो ति एछादनानि च दद्यात् दैवपि
त्र्ये च आसन स्वपा अवाहनार्घ्य अक्षत गंध पुष्प धूप दीपाछादनानां पदार्थानुसमयेन तिसंततिरक्षि श्र काडानुसमयेविधि सिद्धि
रेव ततः हे काल्य सिद्धं तं कुर्यात्॥ अथ गोमयेन चतुरस्रं मंडलं कृत्वा परिपंत्र्यं च हस्तादेवे सौवर्णादीनि पात्राणि॥ पित्र्ये रौप्यादीनि
पात्राणि स्वर्ण रौप्य वच खामानि पात्राणि वा मन्म पवर्जितानि मंडले निधाय तत्र यो निषिंच्य हस्तेनि मज्यं प्रक्षाल्यं पुनर्जले नैक्षा
लयेत्॥ अथाग्नौ पाणौ होमः॥ निरग्नेपाणावेव॥ तत्र घृताक्तमन्नं घृतं चादायाग्नौ करिष्य तद इति संकल्प्य एवं चाकुरु षेत्यभ्यनुज्ञा
तः॥ ओपासनाग्निं उपवीति परिसमुह्य पर्युक्ष्य प्राचीनावीतित्व सोमि ध्यामग्नावाधाय मेक्षणांलेन वे नोपस्तीर्या वदानं द्वयं क्षिप्त्वापं
चावती चेत्त्र पं क्षि त्वा पुनः स्रुवेणाभिघार्या वदाय मेक्षणेन सोमाय पितृमते स्वधा नमः॥ अग्नये कव्यवाहनाय स्वधा नम इत्या
भ्यां मंत्राभ्यां आहुति द्वयं हुत्वा मेक्षणमग्नावनुप्रहृत्य हुतशेषं पित्र्य पात्रेषु क्षिपेत न दैव पात्रेषु आहिताग्निः सर्वाधानी दक्षिणा एम॰
ग्नो जुहुयात्॥ पित्र्य विप्रपाणौ वा॥ अग्न्याभावे पाणि होमः॥ पाणि होमे द्व्यमेक्षणा विप्राभ्यनुज्ञा न संति॥ पित्र्य विप्र पाणिं पारि २६

समुह्य पर्युक्ष्य वामेनोपवीती पर्य दक्षिणेनावदाय प्रस्याभिघार्य कृत्वा परिसमुह्य न पर्युक्षणे स्तः मातामहादिषु चैवं॥ तत्रसाग्निनापा
णिहुतं सदैव ब्राह्मणाचम्योपविश्येत॥ अथवा भाजने क्षिप्त्वाचम्योपविश्येत॥ अग्न्यभावे हुतं तु पूर्वं नाश्रीयात भोजनकाले
एवाश्रीयात्पृथक्कृत्वाग्निहुतं नैवाश्रीयात॥ प्रेतश्राद्धेषु तदन्नौ क्षिपेद्दिगाहुः॥ ततो दैवपूर्वमुपवीती पत्नीपंपत्नीवान्येवानियताः
प्रशास्ता हविष्यान्नपूर्वं परिवेषणं कुर्युः॥ नापवित्रेण हस्तेन नैकहस्तेन वा पक्षेन न हस्तेन परिवेषणं कुर्युः॥ तृणपर्णाद्यं तर्धा
नेन दोषः॥ अथ हविष्याणि॥ व्रीहिशालीयवगोधूमप्रियंगुमुद्गमाषश्यामाकनीवारयवाः॥ कालशाकं महाशाकं द्रोणशाकं
मधूमांसे महाद्रुक्ष्य कदलीफणसाम्रातकाम्लखर्जूरजंबूगोस्तनीद्राक्षाप्रियालामलकनारिकेलत्र पुंसो वा तुकचरचिं
टपालेपगुड फलचिंमधूकपैतमफलं बदर्यादि एलाशुंठीचार्द्रकं हिंगुमरीचपिप्पलीमधूकगुडत्रीकैएखंडकर्पूरसैं
धवशानमलवणानि मधुगव्यपयोदधिघृतानि इत्यादीनि प्रशस्तानि एतत्संभवमोदेनसूपपायसापूपभक्ष्यपानादिकं च
बहुपरिवेषं लवणहिंगुशुंठीपिप्पलीमरीचकानि इक्षुरसका एव्यानि श्राद्धेष्वस्तमप्रसक्ते भक्ष्योपि॥ अथ हविष्याणिको
द्रवचणकमसूरकुलित्थपुलकराजमाषराजबिदलमाषः॥ सत्वच श्राटकपः हलपावनालः हलधान्यानि मुद्गमाषतिल
व्यतिरिक्तानि वर्ज्यानि॥ कूपोदकं तुलसी हल्लातरी शिग्रुमहासर्षप पत्रशाक हलसर्षपपितिंगं धत्तूरकानि कूष्मांडप

स्मृ॰सा॰ टोलकाद्याश्चा विशेषतो हंता हृपालांबुगांधारिकामर्कीरिकापिंडमूली बिल्वफलकांचनालकपित्थकानकाकारंजकाखंदं
२७ कालिंगवं शांकुरपित्र्यर्थो तत्पपाचिं तेष्युक्तहृतं सर्वकुलजीरकान्नातपुष्पीवीडलवणादि असंपपम्मगमहिषीपयोदधिघृत
27 मित्यादीनि प्रशस्तानि प्रशस्तालाभे तन्निषिद्धं ग्राह्याणि अथ पात्रेषु परिवेष्य दैवपात्रे सकुशपवान क्षिप्त्वा पात्रं पपुष्पप्रथि
वीते पात्रमित्यभिमंत्र अतो देवा इत्यच मुक्त्वा विष्णो हव्यं रक्षस्वेति अन्ने द्विजांगुष्ठं निवेश्य पुरूरवार्द्रवा विश्वेदेवा इदं मंन्न
हनिर्ग्राह्य णत्वा हवनीपार्थे पियंभ मिर्गपाअपं ब्राह्मणो गदाधरःविश्वेभ्यो देवेभ्य इदमंत्रे परिविष्टं परिवेष्यमाणं चात्पस्ने
नेममेति पवोदकेन तत्त्वा पर्द्दे वास इत्यचोपतिष्ठेत॥ अथ पित्र्यपात्रेषु तिलान् सकुशान् क्षिप्त्वा पात्रं पपुष्पप्थ्वी तेपात्र
मिति अभिमंत्र इदं विष्णुरित्यचाविष्णो कव्यं रक्षस्वेत्यंगुष्ठं निवेश्य पितरो देवतान्ने कव्यमिस्फलकापित्रे वसुरुपाय पितृ
भ्यो वसुरुपेभ्य इति वोत्क्वा इदमंनं परिविष्टं परिवेक्ष्यमाणं चात्पस्नेर्नममेति पितामहाय रुद्ररुपाय प्रपितामहाय आदित्यरु
पाय पितामहेभ्यो रुद्ररुपेभ्यः प्रपितामहेभ्य आदित्यरुपेभ्य इति तिलोदकेन लोत्पत्त्वा पेचेह पितर इत्यचोपतिष्ठेतं न चात्रोहः
कार्यं मातामहेषु चैवं॥ अतिथिरस्ति चेत् देववदर्चनं कृत्वा त्वेष्टदेवता रुपाय विष्णुरुपाय त्रिवरुपाय वा॥ अन्नं तं त्वा पेदेवा एम॰
इत्यक्षपरख्याप्य देवताभ्य पितृभ्यश्च ससवाधादशारं पपेट्टसादि नज स्वापो न्ना नं दत्वा प्रणव गायत्री मधुमंती त्वाडओं तत्सत्य २७

थ्यासुखेंऊषधमितिब्रूयात्॥अथब्राह्मणप्राणाहुतिपूर्वंमौनिनोभुंजनासात्रमुनुस्मरंतोमुखजान्हुपाण्यादिचापलंवर्जयंतो
भुंजीरंन्॥पद्मान्यादिपालिकासुभिंडीकासुवाप्राणाहुत्यापूर्वंऊर्ध्वंवापात्रेनिधायभुंजीरंन्॥उच्छिष्टसेकपादरजःस्पर्शाक्रमणा
दिभयात्सर्वथानपंक्तिकादित्रिपाषादिषुनिदध्युःनबलिंकुर्युः॥ततोभोक्तृपित्रेकार्त्रेचपदद्योवतेहविस्तद्देयं॥अत्रस्रेएकोग्र
पित्र्यपवित्रमंत्रान्ब्रणवादिपूर्वानुपवीतिश्रावयेत्वाम्रणवगायत्रीजपेत्॥ततःसार्ववर्णिकमन्नाद्यमादायप्रणवमुक्त्वाप्रा
चीनावीतिमधुवाताऋतायतेत्यृचंअक्षन्नमीमदंतेतिचऋचंश्रावयित्वात्प्तास्थेतिपृष्ट्वातृप्ताःस्मेतितैःप्रत्युक्तेदेवपित्र्यब्राह्मण
संनिधौपुरतउच्छिष्टसमीपेदक्षिणाग्रेषुदर्भेषुतिलोदकंपितृतीर्थेनप्रक्षिप्यपेअग्निदग्धायेअनग्निदग्धाइतिऋचाऋत्तनेनसतिल
मन्नंक्षिप्त्वातिलोदकंप्रक्षिप्याचामेत्॥ततोगण्डूषंदत्वासर्ववर्णमन्नाद्यंपिण्डार्थमुद्धत्यअत्रशेषःकिंक्रियतामितिपृष्ट्वाइष्टैःस
होपभुज्यतामित्यभ्यनुज्ञातेतैर्गृहीतेवा॥अग्निहोमेअग्निसमीपेपाणिहोमेविप्रसमीपेपिण्डपितृयज्ञवत्पिण्डानदद्यात्तत्रेवंगो
मयेनोपलिप्तेभूप्रदेशेस्फेनवाखादिरेणकाष्ठेनवादर्भेणवाअपहताअसुराइत्यादिनालेखांप्रागपवर्गमुल्लिख्याभ्युक्ष्यत
त्रबर्हिःएकंशीर्पपश्चिमलेखायांपिण्डदेशेषुस्तंभंतांपितरइत्यादिभिःत्रिभिर्मंत्रैस्तिलोदकंपितृतीर्थेननिनीयपूर्वरेखायांशुंधं
तांमातामहाइत्यादिभिर्निनीयएतत्तेदेवदत्तशर्मन्नेचत्वामत्रान्वित्युक्त्वाएतत्पिंडरूपमन्नंपित्रेनममेत्यादिभिस्तिलमिश्रान्न

स्म॰श्रा॰ एवीनया पिः पिंडान्निधाय अत्र पितर इत्यादिना षट् पिंडान् सकृद्देवानुमंत्र्य सव्यावृत्य उदङ्ङावृत्य पर्यायात्मानुकूलं नाश्रीत्वा
२८ अभिपर्यावृत्य अमीमदंत पितर इत्यादिनानुमंत्र्योच्छ्वसेत्॥ ततः उपवीती पिंडेभ्यो षमाघ्राय हस्तं प्रक्षाल्याचम्य प्राचीनावीती पिंडेषु उ
२४ दकं दद्यात् निनीय देवदत्त अमुर्मेन भ्यंस्त्वेति पिंडेषु तैलं दत्वा देवदत्त अमुर्मेन स्त्वेति अंजनं दत्वा एतद्वः पितर इत्यादिना वासो दशां
ऊर्णास्तुकां वा दद्यात्॥ पंचाशद्वर्षादूर्ध्वं स्वहस्त एव वा दद्यात्॥ तेनैव मंत्रेण॥ ततः पितृभ्यो अक्षतगंधपुष्पधूपदीपनैवेद्यतांबू
लानि दत्वा अथ पिंडान् पितृरूपाननुपतिष्ठेत॥ नमो वः पितर इत्यादिना मनोन्वाहुवामह इति च तिसृभिः अथ पिंडान्युगपत्प्रवा
हयेत परेतनः पितर इत्यृचा अग्ने तमद्य इत्यृचा दक्षिणाग्निं प्रतिगच्छेत्॥ पदं तारि क्षमित्यृचा गार्हपत्यं प्रतिगच्छेत्॥ औपासने तु
अग्ने तमद्येति गत्वा पदं तारि क्षमिति जपेत्॥ तत्र गार्हपत्यस्य पदस्य लोपः॥ पाणिहोमे अग्ने तमद्यादिकं नास्त्येव॥ ततः पिंडेभ्यो अक्ष
तगंधपुष्पधूपदीपवस्त्रतांबूलादि दत्वा वीरं मे दत्त पितर इति मध्यमपिंडमादाय आधत्तेति पत्नीं प्राशयेत्॥ पुत्रापुत्रार्थेऽपि स्व
र्थं पिंडास्तु गोजविप्रेभ्यो दद्यादग्नौ जले वा क्षिपेत्॥ अर्घ्यनिनयनाभ्यां मन्त्रपितृशब्दस्योहो न कार्यः॥ एवं स्वशाखोक्तविधि
ना वा पिंडान्निधाय आचम्याचमनं दद्यात्॥ ततो विप्रहस्ते आपो दत्वा दर्भांजलं पवित्राक्षततिलांश्च क्रमात् क्षिप्त्वा तानि रस पुनः साक्षत स्म॰
पुष्पान् क्षिप्त्वा गोत्रनाम्नां अभिवाद्य गोत्रं वर्धतामिति पावित्वा स्वस्ति वर्धतां गोत्रमिति प्रत्युक्तो प्रक्षिप्य गृहीत्वा पात्राणि चालयेत् २८

त्वा वाचामेत्॥ अनुपनीतस्त्री चेन्न वाचयेत्॥ ततो विश्वेदेवेभ्यः पितृभ्यश्च स्वस्तीति ब्रूते इत्युक्त्वा तैः ओं स्वस्तीति प्रत्युक्ते ततो विश्वे
षां देवानां पितॄणां चाक्षय्यमस्त्विति इत्युक्त्वा अस्त्वक्षय्यमिति प्रत्युक्ते भूमिहिरण्यरजतादि यथाशक्ति दक्षिणां दद्यात् ततो दक्षिणाः पांतु
बहुधेयं चास्त्विति इत्युक्ते तथैव प्रत्यूचुः॥ स्वधां वाचयिष्ये इत्युक्ते वाच्यतामिति अनुज्ञातः॥ पितृभ्यः स्वधोच्यतामित्युक्त्वा अस्तु स्वधेति
प्रत्युक्ते भूमौ जलं सिंचेत्॥ स्वधा संपद्यतामित्युक्ते संपद्यतां स्वधेति प्रत्यूचुः॥ ततो विश्वेदेवाः प्रीयंतामित्युक्ते प्रीयंतां विश्वेदेवा इ
ति प्रत्यूचुः॥ पितरः प्रीयंतामित्युक्ते प्रीयंतां पितर इति प्रत्यूचुः॥ ततो भुक्तपात्रमुत्तानं कृत्वा पवित्राणि विसृज्य विप्रहस्ते अक्षतान्
पुष्पाणि क्षिप्त्वा वाजे वाजे वत वाजिन इत्युक्त्वा उत्तिष्ठंतु पितर इति दर्भेण विप्रान् पितृपूर्वकं विसर्जयेत्॥ ततः पादप्रक्षालनप्रदेशे
आमा वाजस्येति प्रदक्षिणीकृत्य दक्षिणामुखो दाता ऐनोभिवर्धतामन्नं च नो बहु भवेदिति विप्रान्याचितेषु तैश्च ताभ्यां श्लोका
म्यां शुभदास्यात् श्राद्धेन च तथैवास्त्विति वा प्रत्युक्ते आशिषो गृहीत्वा प्रणिपत्य अद्य मे सफलं जन्मेति प्रसादात् सर्वं संपूर्णतास्त्विति
वाचयित्वा संपन्नामित्युक्त्वा निवेद्यानंतमनुव्रज्य आस्यतामित्युक्ते प्रदक्षिणीकृत्य संपांकांतरेण श्राद्धशेषेण वा वैश्वदेवादिकं कृत्वा इ
ष्टैः सह श्राद्धशेषं पूर्वं भुंजीत निमंत्रणादि तद्रात्रौ ब्रह्मचारी स्यात् भोक्ता तु पुनर्भोजनाध्वगमनाध्यापनाध्ययनमैथुनदानप्रतिग्रह
होमादीन्वर्जयेत्॥ पार्वणश्राद्धं सर्वसंग्रहकारमतान्लिखितं॥ अनुपनीतस्त्रीशूद्राश्च श्राद्धमंत्रविजाकारयेयुः॥ स्वयं चामंत्रकं

नामगोत्राभ्यां कुर्युः॥ देवेभ्यो नमः पितृभ्यः स्वधा नम इति मंत्राभ्यां वा॥ पितरो यत्र पूज्यंते तत्र मातामहा अपि॥ अविशेषेण कर्तव्यं
विशेषान्नरकं व्रजेत्॥ एवं काम्यश्राद्धं॥ तत्र धुरिलोचनौ विश्वेदेवौ अग्नौ पाणौ वा होमः नैमित्तिकश्राद्धं चतद्वत्॥ तत्र कामकालौ विश्वे
देवौ॥ वृद्धिश्राद्धं ऋद्धिश्राद्धं च तद्वत्॥ तत्र क्रतुदक्षौ विश्वेदेवौ॥ अथ वृद्धिश्राद्धं॥ तत्र सत्यवसु विश्वेदेवौ॥ विश्वेदेवार्थं मात्रा
घर्थे पित्रा घर्थे सपत्निक मातामहा घर्थे च द्वौ द्वौ विप्रौ युग्मवा यथाशक्ति तो योज्या॥ अमन्त्रा दर्भा यज्ञोपवीति प्राङ्मुखेभ्यो वा उदङ्मुखो दद्या
त्॥ उदङ्मुखो वा प्राङ्मुखः सर्वस्य वर्थान दक्षिणामुखेभ्यो दद्यात् तिलार्थे यवाः नांदीदेवो नां नांदीश्राद्धे क्षणः क्रियतामिति ॐ तथा
॥ प्राप्नुतां भवंतौ प्राप्नुवाम सोदिदक्षिणे पित्र्ये द्विर्द्विः कुशाः कूर्चं पवित्रकं पित्र्ये नांदीमुख पर्वत्वं युग्मत्वं च॥ यवोऽसि सोमदेवत्यः इति यवा
पः स्वधा पात्रस्थाने पुष्पा स्वधा नमस्थाने स्वाहा नमः शब्दः॥ स्वाहार्घ्य इत्यर्घ्यं निवेदनं नांदीमुखाः पितरः प्रियंतामिति वा द्विर्द्विर्गंधा
दिदेयं प्रदक्षिणमुपचारः उदगपवर्गत्वं अग्नौ पाणौ वा होमः अग्नये कव्यवाहनाय स्वाहा सोमाय पितृमते स्वाहेति व्युत्क्रमेण
होमः होमवन्मेक्षणप्रक्षेपः एक्षो ग्रेद्रं शांतिमंत्रान् श्रावयेत्॥ मधुवाता ऋतायते स्थाने उपास्मै गायता नर इति पंच र्चं सूक्तं श्रावयेत्
॥ अन्नान मधुमंत्रां वा॥ अक्षन्नमीमदंत इति संते श्रावयेत् आचांते भुक्ता शयान गोमयेनोपलिप्य प्रागग्रान् दर्भाननु पस्तीर्य दैवपूर्वं दध्य
दधिबदरीफलमिश्रमुत्तरोत्तरे वैकैकस्य द्वौ द्वौ पिंडौ दद्यात्॥ आज्येदधि प्रक्षेपे दैवं पूर्वं दद्यात् शेषं पार्वणवत्॥ अत्र पिंडमात्रस्य

लोपो वा पिंडादिकस्य लोपो वा अथैकोद्दिष्टं ॥ तत्र सर्वश्राद्धानि त्रिविधानि ॥ नवमिश्राणि पुराणानीति ॥ तत्र प्रथमाहाद्येका
दशाहांतं विहितानि नवश्राद्धानि ॥ एकादशाहादिसमाब्दांतं विहितानि नवमिश्राणि ॥ ततः पुरः पुराणानीत्युक्तानि ॥ तत्रैकैको
द्दिष्टेषु दैवं नास्ति ॥ एकदैवं एकब्राह्मणः श्रेकः अपुण्मा वा विप्राः एकं पात्रं पवित्रं च पाणौ होमो नास्ति वा भक्तशेषेणैकः पिंडो देयः पु
रुषः एकोद्दिष्टे पार्वणैकदेशवत् सर्वं दैवहीनं समंत्रकमेव ॥ पाणौ मंत्राभ्यां होमः ॥ नवमिश्रेषु दिवा निमंत्रणं निमंत्रणादि न स्वाधा
पः पितृशब्दः स्वधा नमः शब्दः मंत्राणां लोपः तिलयवावापादि सर्वं तूष्णीं कार्यं ॥ तूष्णीं अर्घ्यनिवेदनावाहमंत्रो ते नाम्ना प्रेतोद्देशेना
र्घ्यं दत्वा गंधादि देयं ॥ पाणौ प्रेताय स्वाहेत्येकाहुतिर्न वा ॥ धूपं दीपं च स्वधाशब्दं पितृशब्दं पिंडे अनुशब्दं जपमभिश्रवणं च वर्जये
त् ॥ अक्षय्यस्थाने उपतिष्ठतामिति वदेत् ॥ प्रतिवचनं तद्वत् ॥ अभिरम्यतामिति विसर्जयेत् ॥ अभिरताः स्मेति प्रत्युक्तिः ॥ नवमि
श्रेपि सर्वं समंत्रकमित्येके ॥ नवश्राद्धे पुनः सर्वं समंत्रकमेव कार्यं ॥ नाम प्रेतशब्दं च न लोपयेत् ॥ सद्य एव निमंत्रणं कार्यं धूपदी
पं श्राद्धशेषभोजनं च वर्जयेत् ॥ नवश्राद्धं कृत्वा स्नायात् ॥ अन्यत्सर्वं पार्वणवत् ॥ नवश्राद्धानि एकादशेह्नि वा कार्याणि ॥ तत्राप्यं
महैकोद्दिष्टं ॥ तत्र बहुदक्षिणा प्रेतवस्त्राभरणपानशय्यासनभाजनपादुकोपानहछत्रादिकं देयं ॥ रुद्रगणे प्रेतोद्देशेन पक्षे नवश्रा
द्धे सोदकुंभं सतिलं सर्वत्र दक्षिणा देया ॥ प्रेतश्राद्धविशेषेण ॥ अथ सपिंडीकरणं ॥ तत्र मंडलत्रयं ॥ देवे द्वौ विप्रौ प्रेतस्थाने त्रे

स्म॰मा॰ कः॥ तत्सित्रादिषु त्रपः॥ अनुज्ञातो दैवे प्रेते पित्र्ये चैकैको विप्रः॥ कामकालौ विश्वेदेवाः॥ देवार्चनं पूर्ववत्॥ प्रेतार्घ्यमेकं पात्रं तत्पित्र्या
३९ घर्थं त्रीणि॥ प्रेतेन वप्रिश्रैकोद्दिष्टवत्॥ पित्र्ये पार्वणवत्॥ पात्राणि पूरयित्वा गंधादि क्षिपेत्॥ पात्राणि तत्रैव निवेद्य प्रेतपात्रं पि
30 तृपात्रेषु क्षिप्त्वा प्रेतपात्रे किंचदेव जलशेषं कुर्यात् अवशेषमप्ये समानाः सुमनस इति द्वाभ्यां पितृपात्रेषु सिंचेत्॥ प्रेतपात्रावशेषेण प्रेतस्या
र्घ्यं पित्रे तत्पात्रार्घ्यं दत्वाच्छादनं तेन॥ त्वा पृथक् पृथक् अन्नमुद्धृत्य प्रेताय पाणावेकाहुतिं जुहुयान्न वा॥ पित्र्यार्थं मध्यौ पाणौ वा मंत्रा
भ्यां होमः॥ हुतशेषं पितृपात्रेषु दद्यात्॥ तदन्नभोजनार्थं प्रकृताश्नीयात्॥ भोजनार्थोन्नेन सहाश्नीयात्॥ प्रेतोद्देशेनैकं पिंडं पित्र्ये
त्रीन् पिंडान्मंत्रतो दत्वा प्रेतपिंडं पितृपिंडेषु संयोजयिष्यामीति पृष्ट्वा संयोजयेत्सनुज्ञातः प्रेतपिंडं त्रिधा विभज्य पूर्वमंत्राभ्यां पितृपि
डेषु निदध्यात्॥ अनुमंत्रणादि सर्वं पार्वणवत्सर्वं तत्रैव समापयेत्॥ श्राद्धभोजने मिथः स्पृष्टे तदन्नमत्यजन् भुक्त्वा गायत्र्याष्टश
तं जपेत्॥ उच्छिष्टस्पृष्टे तत्स्पृष्टान्नमभुक्त्वा स्नात्वा द्विशतं जपेत्॥ उच्छिष्टभोजने सहस्रं जपेत्॥ मातॄणां चैवं॥ तत्र विशेषः॥ अपुत्रा
णां मृतानां भर्ता स्वमात्रादिभिः सापिंड्यं कुर्यात् मातृपिंडदानादिकं असुरविवाहोत्पन्नपुत्रिकापुत्रस्तु गोत्रेण भर्तृगोत्रेण वा कुर्यात्
श्वतसि अन्वारोहणे तु एकचितारोहणे एकदिनमरणे स्त्रियाः पृथक् सपिंडीकरणं न कार्यं॥ भर्तुः कृतेन स्त्रियाश्च कृतं भवति॥ दि एम॰
नांतरमृतौ पुत्रः स्वपितृपितामहपिंडमध्ये कुर्यादनंतर्यापपित्रैकोनमातुः सापिंड्यं कुर्यात्॥ सर्वत्र भर्त्रा पत्न्याः सापिंड्यमेकेनैव ३९

स्वगृह्येण निषिद्धं ॥ केचित्त्रिभिरेव सह सापिंड्यमाहुः ॥ आसुरादिविवाहोत्पन्नः पुत्रिकापुत्रश्च मातामहादिभिरेव ॥ तथा प्रतिमा
तामहश्राद्धं नित्यमेव मृताहादौ ॥ ब्राह्मादिविवाहोत्पन्नः पित्रैकेनापि तत्रेच्छितेपितामहादिभिर्मातामहादिभिर्वा सापिंड्यं कुर्यात्
॥ ब्राह्मणादिहतानां प्रायश्चित्ताकरणे ब्रह्मचारिणामनपत्यानां च सहपिंडीकरणं नास्ति ॥ तेषां सदैकोद्दिष्टमेव वा पुत्राभावे मृतानां भव
वहितैः सापिंड्यं कार्यं न वा ॥ केचित्सर्वत्र सपिंडीकरणमाहुः ॥ संवत्सरादर्वाक् सपिंडीकरणे सति प्रतिदिनं प्रतिमासं वा सोदकुं
भं श्राद्धं मृताहश्राद्धवत् कृत्वा सपिंडीकरणमारभ्य वा शुद्धिमारभ्य वा एकादशाहादिषु तान्येव षोडशश्राद्धानि मृताहश्राद्धवत्कृ
त्वा वा संवत्सरविमोकार्थं पार्वणश्राद्धं भूरिब्राह्मणभोजनं कुर्यात् ॥ मृताहश्राद्धं प्रत्यब्दमेकोद्दिष्टं पार्वणं वा यथास्वाचारं कार्यं पु
त्रैः ॥ मरणाक्षये तन्मासे पक्षे पातिथिः तद्दिनं तस्य मृतस्य मृताहः ॥ पतीनां दासस्त्रीभिः पार्वणमेव कार्यं ॥ दर्शे मृतस्य प्रेतपक्ष
मृतस्य च प्रत्यब्दं पार्वणमेव ॥ यतीनां त्रिदंडीनां प्रेतत्वं नास्त्येव ॥ एकादशेऽहनि पार्वणमेव कार्यं ॥ दंडग्रहणात्सर्वं मृते तु स्व
शाखोक्तविधिना दध्याउदकपिंडप्रेतश्राद्धसापिंड्यादीनि कार्याण्येव ॥ शूद्राणां प्रेतश्राद्धं सर्वममंत्रकं द्वादशेऽहनि कार्यं ॥ मा
से गते वा कार्यं अनाहिताग्नेर्मरणाहादि प्रेतकार्यं मृताहश्राद्धं च ॥ आहिताग्नेस्तेन कार्यं मृताहश्राद्धवद्दहनादिकार्यं त्रिपक्षांतत
स्मादूर्ध्वं मृताह एव ॥ सर्वेषां मृताह एव श्राद्धं कार्यं अष्टकासु गयायां च पितृणां मातृणां च श्राद्धं पृथक् कुर्यात् ॥ नसपत्निकं ॥ मा

स्म॰सा॰ ताममहानां सपत्निकमेव ॥ तत्र दैवं तंत्रमेव पितृपूर्वकं ॥ अनेकमातॄणामेकत्रभोज्याः ॥ अन्यत्पूर्ववत् ॥ वृद्धौ च न सपत्निकस्त्रीपू
३१ र्वत्वं दैवतंत्रत्वं चोक्तमेव ॥ मृताहश्राद्धं पितृमृताहे पितॄणामेव कार्यं न सपत्निकं ॥ मातृमृताहे मातॄणामेव कार्यं ॥ पितॄणां तत्र
31 श्राद्धप्राप्तिरेव नास्ति मातापितृमृताहैक्ये पितृमातृश्राद्धं पृथगेव न सपत्नीकं तत्र पूर्वं पितृश्राद्धं संप्राप्य ततो मातृश्राद्धं कु
र्यात् ॥ पितुर्मृताहैक्ये एकत्र दहने च मातृश्राद्धं पृथगेव ॥ तत्र तु पितृश्राद्धं चैककाले एकपाकेन क्रमेण समापयेत् ॥ मृताहैक्य
एकचितारोहणे सति मातृश्राद्धं पृथगेव ॥ तत्र दैवतंत्रमेव ततः पितरः ततो मातरः अनेकमातरः पृथगेव क्रमेण कालपाकब
र्हिःप्रयोगैक्यं च ॥ भिन्नचितारोहणे सर्वं पृथगेव ॥ मृताहश्राद्धस्यैकोद्दिष्टत्वेप्येष क्रमः ॥ अष्टकागयापाष्टाहसु मृताहदर्शेष्वत्र सपत्नि
कमेव ॥ मातामहानां एतेष्वपि सपत्निकमेव ॥ मृताहवर्ज्यं तत्र पृथगेव सर्वेषां ॥ पितृव्यभ्रातृमातुलगुर्वाचार्याणां तद्वत् ॥ अथा
परपक्षमहालये सर्वेषां पितॄणां श्राद्धं कार्यं ॥ तत्र मातृश्राद्धं पृथक् प्रयत्नं मातामहानां सपत्निकमेव ॥ गुर्वाचार्यपितृव्यमातुल
श्वशुरोपाध्यायभ्रातृसखिशिष्यपोषकद्रव्यदत्तपुत्रशिष्यर्त्विगादीनां तत्स्त्रीणां च श्राद्धं कार्यं अपुत्राणां विशेषेण कार्यं ॥ तत्र
एकः पाकः वैश्वदेवतंत्रं पिंडबर्हिश्चैकं ॥ पक्षश्राद्धे तथैव ॥ तत्सपत्नपोदष्यां एकवर्गस्य श्राद्धं न कार्यं पिंडदानं च निषिद्धं ॥ म स्म॰
घायोगे विशेषतः पुत्रकामस्य च पिंडबर्हिः कुशाः काशा दर्भाः प्रशस्ताः ॥ व्रीहियवगोधूममौञ्जीक्षुकुंदुरुमुंजबल्वजाश्च भवंति ॥ ३१

एकादश्यां त्रयोदश्यां मघायां कृत्तिकासु च॥ पिंडदानेह्ववि निषिद्धाः॥ तस्य च चतुर्दश्यां शस्त्रहतस्यैव श्राद्धं॥ तच्चैकोद्दिष्टमेव
सर्वेषां पापमृत्तानां चैवं॥ तत्र दैवं पार्वणवत्॥ नित्यश्राद्धमदैवं षट्पुरुषं च भवति॥ तत्रात्र देशकालानियमाः कार्त्तभोक्तृनियमाश्च
न संति॥ विप्रानुपवेश्यासनं दत्वा अर्घ्यहोमपिंडवर्ज्यं संकल्पविधं तं कृत्वान्नं सत्कृत्य भुक्तो प्रसादयेत्॥ विवाहमौंजीबंधेनोर्ध्वं षड्वर्षादि
क्रमात्सपिंडीकरणवर्ज्यं श्राद्धेषु सपिंडाः पिंडान्नदद्युः ग्रावर्षं सर्वे कुर्युः पृथक् पिंडान्नपिदद्युः पितृयज्ञे वर्गयाणां वदद्युरेव च॥ सपिंडी
करणवर्ज्यं सर्वश्राद्धेषु वित्तेन पार्वणविधौ नासंभवे संकल्पविधानेकार्यं॥ संकल्पविधानमावाहनार्घ्यहोमपिंडवर्ज्यं पार्वणोक्तं य
थासंभवे भवति अन्याभावे द्विजाभावे प्रवासे पुत्रजन्मनि॥ पत्न्याभावे भाभावे पाककर्त्रभावे सति पत्न्यां रजस्वलायामापदि तीर्थे ग्रह
णसंन्निधौ भोजननिषेधे कालेमृताहे वामश्राद्धे च संग्रहे च रात्रिसंक्रांतौ च अवीराः स्त्रीः शूद्राश्च सर्वदा॥ आमश्राद्धं कुर्युः॥ त
त्राच्छादनं तं कृत्वा आमं चतुर्गुणं द्विगुणं समं वा सोपस्कारं सत्कृत्य दक्षिणां दत्वा संमापयेत्॥ आमे होमपिंडौ न वा स्वस्तिवाचनं नां॥
स्ति॥ अन्नाभावादिनिमित्तेषु हेमश्राद्धं वा कार्यं विशेषतः पुत्रजन्मनि अपलिकः प्रवासनग्निकः तीर्थयात्रायां ग्रहे पुहेमश्राद्धे अवाह
नार्घ्यग्रहपाकाहोमपिंडान कुर्युर्नवा॥ अच्छादनां तेहिरण्यमष्टगुणं चतुर्गुणं द्विगुणं समं वा॥ सदक्षिणं सत्कृत्य पूर्ववत्समाप
येत्॥ अन्नाभावे घनेकनिमित्तेषु सत्कृत्य संकल्पितश्राद्धं कार्यं॥ तत्र द्रव्ये विमेवासंन्निहिते आमहेमस्वल्पधान्यादि वस्तुदाता

स्म॰सा॰ पित्रोद्देशेन संकल्प्य त्यजेत् मासिकानि मृताहश्च सति संभवे अन्नेनैव कार्याणि ॥ सपिंडीकरणं तु सर्वथा अन्नेनैव कार्यं ॥ छ ॥ अ
३२ थ श्राद्धकालविधिः ॥ तत्र तावद्यस्मिन्दिने यद्विहितं कर्म तत्तद्घटिकासु तत्कर्मप्रारंभं समाप्तिं च कुर्वीत मृताहश्राद्धस्य विशेषेणासं
32 भवे प्रारंभं समाप्तिं वा कुर्यात् ॥ अन्हः पंचदशविभक्तेऽष्टमो मुहूर्तः कुतुपः ॥ कुतुपादिपंचमुहूर्तेषु श्राद्धं कार्यं न सायान्हे तः न रात्रौ
नातिप्रातःकाले ॥ अन्हः पंचधा विभागात्त्रिमुहूर्तैः कालः प्रातः पूर्वाण्हो मध्यान्हो पराण्हः सायान्ह इति ॥ प्रातःकाले दृष्टिनिमित्तं श्राद्धं
प्रशस्तं ॥ पूर्वाण्हे आमश्राद्धं हेमश्राद्धं च ॥ मध्यान्हे एकोद्दिष्टं अपराण्हे पार्वणं ॥ पिंडपितृयज्ञकरणदिने सायान्हेपि पार्वणमनुज्ञाप
ते एवं पर्वदिनेषु ॥ अथ खंडतिथिमुच्यते ॥ अमावास्या दृष्टचंद्रा सिनीवाली संज्ञा ॥ नष्टचंद्रा कुहूसंज्ञा ॥ अमावास्या भूतविद्धा न चे
तदपराण्हव्यापिनी ग्राह्या ॥ भूतविद्धा चेत्तां त्यक्त्वा अपरेद्युरपराण्हव्यापिनी तिथिर्ग्राह्या ॥ मध्यान्हात्पुरस्तादमावास्याप्रतीतो भूतवि
द्धा भवति ॥ अस्यां तिथिक्षयविषये अपरेद्युरपराण्हे अमावास्याऽभावे भूतविद्धापि सिनीवाली सायान्हव्यापिनी ग्राह्या ॥
ततोर्वाचीनक्षयेपि भूतविद्धा सिनीवाली अपराण्हव्यापिनी सर्वैर्ग्राह्या ॥ यद्वा साग्निकैः सिनीवाली निरग्निकैः स्त्रीशूद्रैश्च कु
हूः ॥ अस्यां तिथिवृद्धौ भूतविद्धां सिनीवालीं त्यक्त्वा पराण्हव्यापिनी कुहूर्ग्राह्या ॥ ततोर्वाचीनवृद्धौ भूतविद्धां सिनीवालीं त्यक्त्वा मध्या एम॰
न्हव्यापिनी कुहूर्ग्राह्या ॥ द्वयोरपि मध्यान्हव्यापित्वे तिथिसाम्ये वृद्धौ पान्त्यं न एति तिथिर्ग्राह्या ॥ यद्वा साग्निकैः सिनीवाली निरग्निकैः स्त्रीशू ३२

दर्शकुहूः॥ पक्षास्सर्वैः कुहूर्ग्राह्या॥ दर्शपूर्णमासयोश्राद्धतिथिवृद्धिक्षयसांवत्सरिकादौ नान्यत्र अस्ताह चापराण्हे व्यापिन्येव तिथिर्ग्राह्या
अपराह्णः पितृणांस्वयंमुवादतः नास्तमयत्रिमुहूर्त्तव्यापिन्येव तिथिर्द्वयोः परैव ग्राह्या॥ तिथिसाम्ये तु पूर्वपूर्वा वा॥ तिथिक्षये तस्त
मये त्रिमुहूर्तव्यापिन्येव तिथिर्ग्राह्या॥ अपरदिने श्राद्धकरणासंभवे सूतकादिविघ्नसंभवे पूर्वैवास्तमयव्यापिनी ग्राह्या॥ केचित्तु॥
दापूर्वविद्धा ग्राह्येत्याहुः॥ तत्तु बहुस्मृतिमापविरोधान्नेच्छन्ति॥ पूर्वदिने श्राद्धकरणासंभवे सूतकादिविघ्नसंभवे च परे उदय
व्यापिनी मयोगपर्याप्तकालातिथिर्ग्राह्या॥ तत्राम्नाह श्राद्धस्य द्व्यासंभवेनास्मेन विघ्नेन वा अनुपपत्तौ उपपत्त्यनंतरं कार्यं॥ सूत
कादिविघ्ने च शुध्यनंतरं कार्यं॥ पदार्थक्षेकादस्यामभावस्यां कार्यं॥ पक्षाअनंतरमासेतद्दिने कार्य एकोद्दिष्टे संप्राप्ते विघ्ने स
ति अनंतरमासे तद्दिने कार्यं॥ तदानीमेव षोडशश्राद्धानि कार्याणि॥ अनुपपत्तिनिमित्तविघ्ने सति उपपत्त्यनंतरं सर्वाणि कार्या
णि॥ उपर्यपि मासिकश्राद्धविघ्ने सत्यनंतरमासि तद्दिने वा कार्यं मृतदाम्नेव षोडशश्राद्धानि कार्याणि॥ प्रोषितमरणे अस्ताह ज्ञा
ने सति तन्मासदर्शे ग्राह्यः॥ मृतमासाज्ञाने अस्ताह परिज्ञाने सति मार्गशीर्षमासे वा भाद्रपदे वा माघे वा तद्दिने कार्यं॥ मरणदिन
मासौ न विज्ञातौ चेत् प्रस्थानप्रवासदिनमासौ पूर्ववत् ग्राह्यौ॥ प्रस्थानप्रवासदिनमासौ न विज्ञातौ चेत् मरणवार्ताश्रवणदिनमासौ पूर्वव
त् ग्राह्यौ॥ मरणवार्ताश्रवणदिनमासौ न विज्ञातौ चेत् पुनर्दहनदिनमासौ पूर्ववत् ग्राह्यौ॥ पक्षास्सर्वत्रापि कालपक्षमरणे दर्शो ग्राह्य

स्मृ॰सा॰ ॥शुक्लपक्षमरणेपक्षमासः॥सर्वात्मनामृताहज्ञानेमाघमासस्यदर्शोग्राह्यः॥अप्रोषितस्यासर्वात्मनापिमरणदिनमासाज्ञानेएवमेतत्
३२ श्राद्धं॥युगादिमन्वादिप्रभृतितिथिविशेषेषुविहितश्राद्धेषुतुशुक्लपक्षेउदयव्यापिनीतिथिर्ग्राह्याकृष्णपक्षेअस्तमयव्यापिनीशुक्ल
33 पक्षस्यपूर्वाण्हेकरणंप्रशस्तं॥कृष्णपक्षस्यापराण्हेकरणंप्रशस्तं॥नक्षत्रविहितश्राद्धेष्वपिशुक्लपक्षेउदयव्यापिनक्षत्रदिनंश्राद्धे
कृष्णपक्षेअस्तमयव्यापिदिनंग्राह्यंअथसंक्रांतिफलउच्यते॥संक्रांतिषुसर्वत्रोभयतोषोडशघटिकाःपुण्यकालःअष्टअष्टघटिकासुर
दृफलंदृष्टमुच्यते॥तत्रकर्कटसंक्रमोदक्षिणायनं॥दक्षिणायनेपूर्वेत्रिंशत्घटिकाःस्नानदानश्राद्धादिषुपुण्याः॥तथाविष्णुपदेषु
चपूर्वेषोडशघटिकाःपुण्याः॥वृषवृश्चिककुंभसिंहसंक्रमाविष्णुपदाः॥तुलमेषौविषुसंक्रमौतत्रपूर्वेदशघटिकापश्चाद्दशघटिकाः
पुण्याः॥षडशीतिमुखेषुपश्चात्षोडशघटिकाःपुण्याः॥मिथुनकन्याधनुर्मीनसंक्रमाःषडशीतिमुखाः॥मकरसंक्रमणंउत्तराय
णं॥उत्तरायणेपश्चाच्चत्वारिंशत्घटिकाःपुण्याःपूर्वेचत्वारिंशत्घटिकाःपुण्याःप्राहुः॥अर्धरात्रादर्वाक्संक्रमेषुसत्सुपूर्वदिनपु
ण्यंतत्रभोगःकार्यः॥अर्धरात्रादूर्ध्वंसंक्रमेषुसत्सुपरदिनेपुण्यंतत्रभोगःकार्यःअर्धरात्रेसंक्रमेषुसत्सुदिनद्वयंमहापुण्यंतत्रभोगः
कार्यः॥पद्माग्रहणसंक्रांतिविवाहोत्क्रांतिहस्तिषुरात्रावपिस्नानादिकंकार्यं॥व्यतीपातादियोगःकृतुपादिकालयोगीगास्तःचतिथ्या एम॰
दिकरणेतथैव॥इत्यादिस्मृत्यर्थसारेश्राद्धकालनिर्णयः॥अथपर्वनिर्णयउच्यते॥पर्वणिसंपूर्णेअन्वाधानंप्रतिपदियागः॥ ३३

खंड पर्वणि उच्यते ॥ पौर्णमासी स्यानुमतिः ॥ पूर्ण चंद्रा एकेति द्विधा ॥ अमावास्या दृष्टचंद्रा सिनीवाली नष्टचंद्रा कुहूरिति द्विती पा ॥ प्र
धान कर्मेति येतरत्र ॥ यथोक्त स्थिता स्यपोर्ध्वे पूर्वेण द्विथो प्राक्षिप्यंकालौ विज्ञेयः ॥ स्वरूपेणावर्तनात्सर्वेमावर्तने वा पर्वप्रतिपत्संधौ रति
तस्मिन्न हनि यागः ॥ आवर्तनादूर्ध्वं संधौ परेहनि प्रतिपच्चतुर्थांशमति पदितुश्चर्याध्र पौंशायागकालप्रत कालपोगी ॥ अपराह्णे संधेप
रेहनि प्रतिपच्चतुर्थांशोपि यागकालः ॥ न पूर्वाह्ण संधौ ॥ अपराह्णो द्विधा विभागः ॥ पूर्वोक्तं पर्ववद्रूपे समानं ॥ पौर्णमास्यां विशेषो वक्ष्यते ॥
आवर्तनात्पूर्वसंधौ सद्यस्कालो न वा ॥ आवर्तनात्पूर्वसंगवादूर्ध्वं पर्वसंधौ तु सद्यस्काल एव ॥ सर्वो पौर्णमासी यजनीयदिने पर्वणि वा
सद्यस्कालेके चिदाहुः ॥ कृतौ सद्यस्कालं च कदाचिदपि नास्ति विकृतौ वैवतदिति चेच्चित् ॥ किंच पौर्णमास्याममावास्यामपि विशेषः ॥ आ
हस्वसंतदीर्घेषु तिथिद्वासे सति उदयसमीपे पर्वचतुर्थांशाभावेपि पूर्वाह्णे पर्वसंधिश्च भवति तत्रैव पूर्वाह्णसंधिदिने वा यागबाधे
नामत्र तत्र परेहनि यागः ॥ नमावास्यायां तु अपराह्णपर्वसंधौ सति उअपरेह नि दृष्टचंद्रेपि यागः कार्यः ॥ पूर्वाह्णे संधौ सति प्रत्यक्षं चंद्र
दर्शनाहे यागेऽकर्मा वस्त्वः हेत्वाज्याहुतिं हुत्वा विप्राय दंड दानं प्रायश्चित्तं ॥ प्रायां चंद्रदर्शने अन्वाधाने सति परेहनि त्रिंश्समाप्यामात्रिह
विष्कंभिः कार्या ॥ तत्राग्नि पवित्र कृद्वाक पोलः ट्टद्रोष्ट त्र हाएकादशकपालः ॥ अग्निर्वैश्वानरो द्व्यकपालः सशरं धेनुर्दक्षिणा ॥ एषा वा
वाजसनेयोक्ता ॥ प्रकृतिरेव वा पुनः कार्यः ॥ मनस्वत्याज्याहुतिर्वा ॥ आहत्याज्याहुतिर्वा ॥ दिनद्वये प्रातर्यागकाले सत्यपि पूर्वापह संधि

स्मृ॰सा॰ दिन एव प्रात पांगः॥ सर्वथा संधिरेव पागोत्कर्षापकर्षप्रपोजकः तिथिवृद्धौ ह्रासौ न प्रपोजकौ॥ चतुर्दशीति पुरस्त्वाधाने निपिध्यते न पागे
३८ ॥प्रारब्धप्रकृतौ चेद्विकृतौ च परस्युः स्यच्च काला लः॥ आवर्तनात्तु एसंधौ प्रकृतिं समाप्य विकृतिः कार्या॥ ऊर्ध्वं संधौ विकृतिं समाप्य प्रकृतौ॥
प्रारंभः॥ आग्रपणं पर्वालाभे शुक्लपक्षे देवनक्षत्रे कार्यं॥ कृत्तिकादि विशाखांतं॥ प्राच्यां चंद्रदर्शने पिंडपितृयज्ञः कालः॥ इत्यादि स्मृत्यर्थ
34 सारे पर्वनिर्णयः॥ अथैकादशीनिर्णयः॥ एकादश्यामुपवासः कार्यः॥ स च पुत्रवतां गृहीणां शुक्लैकादश्यामेव न कृष्णैकादश्यां॥ कृष्ण
कादश्यामेकान्नमयाचितं नक्तमेकभक्तं दानं वा स्नात्वा कार्यं॥ सर्वथा न निर्द्वादशीको भवेत्॥ उपवासाशक्तश्चैवं कुर्यात्॥ पुत्ररहितानां त्र
हृणीनां पतीनां वानप्रस्थब्रह्मचारिस्नातकविधवानामुभयैकादश्योर्नित्य एव॥ वैष्णवानां च॥ विष्णुभक्ता वैष्णवाः॥ यदि सेद्धिं सापुत्र
श्रियमायुःप्रजां सुखं॥ एकादश्यां न भुंजीत पक्षयोरुभयोरपि॥ इति वैष्णवव्रतत्वेनोपवासितां कृष्णा न निषिद्धा॥ एकादश्यां श्राद्धे
कृते श्राद्धशेषमाघ्रायोपवसेत्॥ रविवारसंक्रांत्यादिषु पैकादश्युपवासस्य निषेधो नास्ति महापातकमहोत्सवेषु च॥ मृतके वध्यंतौ
नत्याज्यं द्वादशीव्रतं॥ तत्र नित्ये स्नात्वा देवतार्चनरहितमुपवासं कुर्यात्॥ काम्ये तु स्नात्वा पत्नीपतिपुत्रभ्रातृभगिनीमृत्विजं अन्यं
वा अर्चनादिकारयेत्॥ सूतकांते वांते दानं कुर्यात्॥ सूतकांते वांते दानं कुर्यात्॥ मध्ये चेत्पतिः पत्नी वा न कुर्यात्॥ सपत्न्यो परस्परं कुर्युः एम॰
अन्यव्रतेषु चैवं॥ एकादश्याः पूर्वोत्तरदिनयोरेकभक्तं चरेत्॥ कांस्यमांसमसूरं अतिघृतमतितृप्तं पुनर्भोजनमैथुनं च पूर्वेऽह्नि वर्ज ३८

सजेत्॥ अथ समाहित एकादश्यां प्रातः स्नात्वा संकल्पं कुर्यात्॥ एकादश्यां निराहार एव॥ स्थित्वाहनि परे स्वहं॥ भोक्ष्यामि पुंडरीकाक्ष
शरणं मे भवाच्युतेति॥ संकल्प दिवास्वापमैथुनतांबूलादिभक्षणमहज्जलपानं न सर्वभोगान् उदक्यासूतिकापतितपाखंडीहीनजा
ति संभाषणं च वर्जयेत्॥ पुष्पस्त्रीणां पुष्पालंकारवस्त्राणि गंधधूपानुलेपने॥ उपवासे न दुष्यंति दंतधावनमंजनं॥ वाग्यमलोपे
वैष्णवमंत्रं जपेद्विष्णुं स्मरेद्वा॥ मनोवाक्कायपनियमलेपे शारीरमनःकारणोपघातं हत्वा वांजपेत्॥ विष्णुं स्मृत्वा संपूज्य पुरतो जागरणं वा
निद्रां कुर्यात्॥ क्षोभमते पुनः संपूज्य॥ अज्ञानतिमिरांधस्य व्रतेनानेन केशव॥ प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भवेति नत्वा पारणं
कुर्यात्॥ कांस्यं मांसं क्षौद्रं लोभमसत्यं तैलं तिलपिष्टं व्यायामं मंजनं च पुनर्भोजनमध्वागमनं अपास्य दिवानिद्रां मैथुनं च वर्जयेत्॥
उपवासफलं स्यात् किं हरेर्मोः॥ एकादशी शुद्धा संपूर्णा द्वादश्यां नास्ति द्वादशी च समा न्यूनाधिका वा तदा एकादश्यामुपवासः॥ य
दा संपूर्णैकादशी द्वादश्यां किंचिन्मात्रास्ति द्वादशी च त्रयोदश्यामस्ति॥ तदा द्वितीयैव सर्वैरुपोष्या॥ यदा संपूर्णैकादश्यां द्वादश्यां
किंचिन्मात्रास्ति तत्र एत्रिशेषे त्रयोदशी॥ तदा गृहस्थैर्वपूर्वोपोष्यात्॥ उत्तरा यतिभिः॥ यदा दशमीविद्धैकादशी द्वादश्यां किंचिं
न्मात्रा विद्यते द्वादशी च त्रयोदश्यामस्ति वा न वा तदा सर्वैर्द्वितीयैवोपोष्या॥ यदा दशमीविद्धैकादशी द्वादश्यां किंचिन्मात्रास्ति तत्र एत्रि
शेषे त्रयोदशी तदा दिनक्षयेति पुण्या द्वितीयैवोपोष्या यतिभिः॥ गृहस्थैः प्रजार्थिभिः गृहस्थैः पूर्वोपोष्या॥ यदा दशमीविद्धैका

स्म॰सा॰ दशी॥ द्वादश्यां नास्ति द्वादशी तु त्रयोदश्यामस्ति तदा द्वादश्योपोष्या॥ यदा दशमीविद्धैकादशी द्वादशी च समाप्ता वा तदा पतिव्र
३५ ति विधवायतिरिक्तानां दशमीविद्धैकादश्यां उपवासः॥ यतीनां वैष्णवानां च शुद्धद्वादश्यामुपवासः॥ यदा च दशमीविद्धैकादशी
35 एत्रिशोष च त्रयोदश्यां चास्ति समाप्ता वा तदा वैष्णवयतिरिक्तानां सर्वेषां दशमीविद्धैकादश्यामुपवासः॥ एकादशीव्रतमाहे
श्वरमपि भवति लिंगपुराणदृष्ट्या॥ अष्टमीचतुर्दश्योर्नक्तं च कार्यं॥ एकभक्तं वा॥ तत्पुरुषेण संकल्पः॥ पारणं च नाम्ना वा॥ तदेका
दश्यादिव्रतं सौरमपि भवति॥ सौरपुराणं च नित्यं तु सर्वं समानमेव॥ तत्रापि विशेषः॥ षष्ठ्यां तु मुपवासश्च कार्यः॥ रविवारे एकभक्तं
च कार्यं॥ सा विद्यानाम्ना वा संकल्पः॥ इत्यादि स्मृत्यर्थसारे एकादशीनिर्णयः॥ एकादश्यष्टमी षष्ठी पौर्णमासी चतुर्दशी॥ अमा
वास्या तृतीया च उपवासव्रतादिषु॥ परविद्धाः पुण्याः॥ शेषाः पूर्वविद्धाः कार्याः॥ कृष्णपक्षेष्टमी चतुर्दशी च पूर्वविद्धा प्रशस्ताः
तृतीया नवमी च तथैवैके॥ सर्वत्र व्रतादीनां कृष्णपक्षः शुक्लपक्षो विधीयते॥ अपराह्णः पूर्वाह्णो विशेष्यते॥ तद्दशं भवेदुदयाद्धि
मुहूर्तं ग्राह्यं॥ उपवासे घटिकैकाग्राह्या अविद्धानामलाभे तु यथोदाधिव्रतानि तु॥ सकृद्देवाल्पमश्रीपादुपवासस्ततो भवेत्॥ एका
दशीं तु पंचमुहूर्तविद्धाप्युपोष्याः॥ तदर्धविद्धान्यन्याविदिनानि॥ प्रदोषव्यापिनी ग्राह्या॥ तिथिर्नक्तव्रते सदा॥ उपवासकृनीयं नक्तं रा॰म॰
तूपवासतिथ्यावेव कार्यं तिथिनक्षत्रसंयोगविहितव्रते च॥ प्रदोषव्यापिनी तिथिर्ग्राह्या॥ नक्षत्रव्रते अर्धरात्रादर्वाक् नक्षत्रव्यापि ३५

नीतिथिर्ग्राह्या ॥ नक्षत्रयोगेनयातिथिपुण्यांतस्यांविहितव्रतेसैवतिथिर्ग्राह्या ॥ श्रवणद्वादशीव्रतेउपवासव्यापिनीश्रवण
द्वादशीग्राह्या ॥ अत्र एकादशीद्वादशीचरात्रिशेषेत्रयोदशीचेद्वादश्यांद्वादशीहंतितत्रयोदश्यांतुपारणं ॥ सर्वत्रतिथिनक्षत्रां
तेपारणं ॥ नियमाःपूर्वमेवोक्ताः ॥ संक्रांत्यारविवारेग्रहणव्यतीपातेकृत्स्नैकादश्यांचपारणं ॥ चोपवासंचनकुर्यात्पुत्रवान्
गृहीति ॥ संक्रांत्यादिप्रयुक्तस्याचनिषेधोनान्यप्रयुक्तस्यद्वादश्यादिस्पृक्त्वपर्यवसारेतितिथिनिर्णयः ॥ ॥ अथमलमासेकार्याकार्यनि
र्णयउच्यते ॥ सूर्यसंक्रांतिरहितोमासोमलमासः ॥ तत्रमलमासेअनन्यगतिकमरणेपातिक्यापातकंनित्यंनैमित्तिकंचकार्यं
तत्रनित्यंसंध्योपासनाग्निकार्यपंचमहायज्ञातिथिपूजाग्निहोत्रोपासनहोमदर्शपूर्णमासयागार्वणेष्टिपार्वणस्थालीपाकपिं
डपितृयज्ञामावास्यापार्वणश्राद्धमासिकश्राद्धदेवतार्चनंनित्यदानादिकंनित्यंमलमासेपिकार्यं ॥ अनन्यगतिकंनित्यमं
नन्यगतिकंसोमयागपशुबंधाधानाग्रयणचातुर्मास्यादिकंमलमासेनकार्यं ॥ महालयाष्टकोपाकर्मोत्सर्जनश्रवणा
कर्माश्वयुजीप्रत्यवरोहणेनियमादिकंपत्न्यकर्मकर्तुमासप्रयुक्तंविहितंतच्चमलमासेनकार्यं ॥ उत्तरमासिकार्यमेव ॥ नैमि
त्तिकंचगर्भनिमित्तंचगर्भस्त्रावसप्तपुत्क्यावहनंपुंसवनानवलोभनसीमंतजातकर्मादिकंतन्निमित्तम्फदपिकंदानादिकंच
चंद्रसूर्यग्रहेस्नानतर्पणश्राद्धदानादिकंचमघात्रयोदशीश्राद्धादिकंचतीर्थेस्नानजपतर्पणश्राद्धपिंडदानप्रवदहिति

स्मृ०सा० लहोममरणकालश्रुध्यपादिकंदहनोदकंपिंडदानार्घश्राद्धनवश्राद्धषोडशश्राद्धानिप्रेतत्वविमोक्षार्थान्यन्यान्यपितृसपिंडी
३६ करणादीनिनैमित्तिकान्यनन्यगतिकत्वेनमलमासेप्राप्तेकार्याणि॥ततःसंवत्सरविमोक्षांतमनुमासिकानिसर्वेमलमासे
36 नैवकुर्यात्॥उत्तरत्रकुर्यादेव॥संवत्सरांतेसपिंडीकरणसंवत्सरविमोक्षंचयथाकालंमासिकानिसर्वेमासेनैवकुर्यात्
उत्तरत्रकुर्यादेव॥मलमासमृतानामविकंप्रत्याब्दिकंश्राद्धंमलमासेपिकार्यं॥अन्येषामुत्तरमासेकावकार्यं॥वार्धषिके
मृतेवाधिकंमासंनवर्जयेत्॥आवषट्कारहोमानित्यनैमित्तिकप्रवृत्ताकाम्यार्थाःप्रापाश्रितेष्विस्थालीपाकहोमाद्याश्चम
लमासेपिकार्याः॥नैमित्तिक्यापिजातेष्टिर्मलमासेनकार्याः॥उत्तरपर्वणिकार्या॥अन्वाधानानंतरंअचारंभणीयेष्टिश्चाग्रयणस्था
पाकंचमननमासेनकुर्यात्॥काम्ययागहोमादिकंमलमासेनकार्यं॥ननमासादर्वाक्प्रवृत्तंकाम्यंकर्ममलमासेआगतेनंतासं
कार्यमेव॥पुराणत्वान्यभावेननिर्वाहाभावेमलमासेपिरूपामाकैराग्रयणमातुरःकृत्वानवंभुंक्त्वायथाकालंत्रीह्याग्रयणंकु
र्यात्॥वसंतात्पर्वणयागेवसोमयागेवप्रकृतेश्रोतत्रइष्टिंपर्वैकमेवतच्चमलहविष्टंचेत्तत्रनित्यापिसोमयागोनकार्यः॥तत्रलो
परएवा॥क्षपत्नीरजोदर्शनवत्॥इतिस्मृतिसर्थसारेमलमासनिर्णयः॥अथमक्षामस्यविधिः॥संस्कारडषट्कपाडषट्स्वभाव स्मृ०
ट्स्कंचनाघात॥संस्कारडषट्वैश्वदेवादिरहितंक्रियापाडषट्पकार्यंम्यावंनथात्वो॥एसमावडषट्लस्मुनदिवकलिंगकपककु ३६

श्रीकर्दंतालांबुवंन्यंकोटकीकुसुंभरक्तशुग्रुकोविदारश्लेष्मांतकनालिकाच्छत्रश्वेतकंटकेवृंताकानि दुर्गंधिकंदमूलफला
निचवर्जयेत्॥ पतिव्रतिनो सदावर्ज्जआलांबुशुग्रुवृंताकानिजातिमात्रेणैववर्ज्यानिसिंग्रितरंकपालेआंत्राणिनएवचर्मतिला
निक्रमातअच्छंम्यादिषुवर्ज्यानि॥ सगोत्राभर्तुरन्नकारुकान्नंवस्त्रेणपाणिनावधूतमवघ्रापतमवस्कृतमिसादिप्राप॥ श्रितदीक्षा
नमस्यंनमस्यते॥ इत्योदिष्टसर्वत्रभोजनमध्याविधिः॥ ॥अथभोजनविधिः॥ कृतकालसपादौप्रक्षाल्यबहिर्हिरण्यचम्यप्राङ्मुख
उदङ्मुखोवायज्ञोपवीतिसोत्तरवासाविभवेरत्नहिरण्यपाणिर्गंधाद्यंतमाल्यवान्श्रीपर्णाश्लक्ष्णचतुष्पादपीठेसुखासीनोमौ
पादौप्रतिष्ठाप्यंतर्जानुकरोवाग्यतःस्नाश्रितंतुरगोमयमंडलेसपर्यंतविप्रोदीपसंनिधौभुंजीत॥ त्रिकोणमंडलेन्यपः॥ वर्तुलैवै
श्यः॥ अभ्युक्षितोभ्यद्रोभुंजीततत्रमंडलेपालिकापत्रिपादौसुस्थाप्यामन्निधायप्रक्षाल्यपंचपत्रावत्रिंबंपूर्वमुसंस्कृतंहितमि
ष्टंतेघृताद्युपस्कृत्यमौनभांपीदत्तमातिथ्यागतपुत्रभ्रात्रादिपरिहृतरएकांतेभुंजीत॥ तदंनमकुत्सयन्ब्रह्मग्रंथिरहितपवित्र
दक्षिणीगापत्राभ्युक्षितं॥ ओंभूर्द्रित्यादिद्रप्रणवमंत्रेणाभिमंत्रितंपमायनमः चित्रगुप्तायनमः॥ सर्वभूतेभ्योनमइतिभू
मौबलिंदत्वाहस्तपादवदनाद्रेःकरमध्येन्नानमनषूपनसस्तंतत्वैनेतिप्रदक्षिणंपरिषिच्य॥ अमृतोपस्तरणमसीत्यपोशानं
गृहीत्वासर्वांगुलिभिःसर्वान्ग्रासान्प्राणाय॥ अपानायनमः॥ व्यानायनमःउदानायनमः॥ समानायेतिस्वाहांपंचाहुतीःसन्नाङ्

स्म॰स्मा॰ती॰ध॰ता का॰ लक्ष्मीरवाहूत्वा वाक्पाणिपादचापलं वर्जयेत्॥ हस्तं त्वंग्रासं सांगुष्ठाग्रेण न मुक्त्वा अमृतापिधानमसीति गंडूषमर्धं
३७ पीत्वा अर्धं भूमौ बहिः पाणिनि नयपवित्रं विलग्नं भूमौ पात्रे वा क्षिप्त्वा सम्यग्गुष्ठं प्रक्षाल्य हि रचामेत्॥ वाससा ततो हस्तौ सम्
37 ध परिश्राव्यांगुष्ठेन चक्षुषी निषिच्य दक्षिणीस्पृष्ट्वा अग्निमुपस्पृश्य इष्टदेवतां स्मरेत्॥ भोजनगृहे वासनस्थो न चामेत्॥ नाज
लिना पिबेत्॥ न पितृतीर्थेन॥ गोमयं मृन्मयं वाश्वत्थपालाशमार्कघुणकेनभिन्नमपो वधं च पीठं च वर्जयेत्॥ ताम्ररौप्यसौव
र्णान्मृवर्जं भिन्नभाजनं वर्जयेत्॥ नम्युष्ट्कपाणिप्रदो भुंजीत॥ न तिष्ठन्न गच्छन्न लम्बहस्तो न त्र्यपानो न पेत्र्यो नेन खट्वापां न संध्यापां न शयन
स्थितो न तत्र भाजनं निधाय न जानौ निने त्संगे वामपाणितले निधाय न भुंजीत॥ न शिशुभिः सहन परस्परतां चैषान प्रपनजामि बालद
क्षातुरेभ्यो अप्रदानाग्निविप्रेभ्यो प्रदान भार्यापासहाश्रीयात्॥ विवाहवर्जं॥ नार्द्र वस्त्रो न वस्त्रादिकं पर्यंकिकं कृत्वा॥ न प्रौढपादो
नासनारूढपादो न विदिमुखो न दुष्टपंक्तौ जलतृणाग्निभस्मपथिस्तंभैः पंक्तिः भिद्यते॥ ग्रहणे नाश्नीयात्॥ तदास्नानंतर पश्चाश्रा
निकृत्वा॥ मोक्षस्नानं कृत्वाश्नीयात्॥ सूर्यग्रहे पूर्वं चतुर्थयाममन्नाश्नीयात्॥ चंद्रग्रहे त्रियामं॥ अमुक्तयोरस्तंगतयोर्दृष्ट्वा स्नात्वाप
रेहन्यद्यात्॥ न संध्ययो नार्धरात्रे नाग्निपावकमृग्गृहेषु न पत्तोपवीतिनवा महस्ते न नत्राखेन न पाणिपृष्ठेन केवलपाणि स्म॰
तलेन न नवस्त्रे भुंजीत नासमसहासने॥ नायंत्रिकापां पतिब्रह्मचारि विधवा भुंजाते त्यादि सर्वं॥॥ अथ काले सायं संध्यामुपास्य हो ३७

मं वैश्वदेवं ॥ अतिथ्यं च कृत्वा मत्स्ये परिहृतो लघु भुक्त्वा स्वपेत ॥ स्त्रिया सह सुगंधानुलेपनमाल्यतांबूलादि सेवमानः स्वपेत ॥ न संध्या
यां भूम्यालये स्मशाने एकवृक्षे च तुष्पथे शिवालये मातृकापक्षनागस्कंदभैरवादिदेवगृहेषु कुले च न स्वपेत ॥ धान्यगोदेववि
प्राग्निगुरूणां चोपरि वाशुचौ ॥ अशुचिरार्द्रवस्त्रपादो नग्नो न स्वपेत ॥ प्राक्शिरा दक्षिणतः शिरा वाद्गृह देवतां नत्वा स्मरन् वैष्णा
वं दंडं ज्ञापन स्मृपि निद्रां धापस्वपेत ॥ प्रक्षालितपादः कृतरक्षः स्वपेत ॥ प्रदोषापरयामौ विविधयान स्वपेत ॥ ~~इत्याह्निकं~~
~~र्धालोहलाह्निकं~~ समासे ॥ छ ॥ ~~अथ द्रव्यशुद्धिरुच्यते~~ ॥ तत्र विण्मूत्रशुक्रार्तववसासृग्मज्जामद्यामत्स्यं तैर्वोपहतिकारणानि ॥
श्वविड्वराहविडालादिवुरीषादी निर्वणविएन रवश्लेष्माद्दूषिकास्वेदादिमल्योपहतिकारणानि ॥ तथा उच्छिष्टेन शूद्रेण सू
तिकेभिर्हिंजैरस्पृश्यकाकादिभिश्वानस्पृश्यविड्वराहादिपशुभिः ॥ स्पर्शेन मल्योपहतिरुच्यते ॥ पंचमाधंत्यजातिचांडालाधैः
सूतिकापारजश्वलापापतितैश्चशवेन च शवं स्पर्शो च संस्पृश्येऽ असंतोपहतिर्भवति अल्पकाले अल्पदेशे मघसंस्पृश्ये उच्छिष्टह
र्धिएधैर्बहुकालवं स्तुविशेषे चात्यंतोपहतिर्भवति ॥ सौवर्णराजतं लोहं विण्मूत्रादिस्पृष्टमात्रं निर्लोपजलं प्रक्षालनाच्छुद्धिः ॥ स
लेपं भस्मजलाभ्यां शुध्येत ॥ अत्यंतोपहतं वह्नितसंजलं प्रक्षाल्य शुध्येत ॥ सौवर्णराजतं चांम्ले चांडालोदक्याकुत्रिसह ॥ भस्मभिः ॥
स्लोष्णोदके न च शुध्येत ॥ कास्यादेवावर्तनं बहूपघातेसर्वेषामावर्तनमेव ॥ तैजसानां गोमुत्र परिवासेन ॥ लपानपगमो आवर्तनं

स्मृ॰मा॰ ॥ छ ॥ ताम्रस्य विण्मूत्रादिचांडालादिहर्षितस्य च आम्लोदकाभ्यां शुद्धिः ॥ कांस्यपित्तलयोः विण्मूत्रादिगंडूषपादप्रक्षालनचांडा
३८ दिस्पर्शे तद्दैवत्रिःसप्तवारं कृत्वा भस्मना परिमृज्य प्रक्षालनाच्छुद्धिः ॥ अल्पकालोपहतौ तापनपरिलेखनाच्छुद्धिः ॥ बहुकाले आवर्तनं ॥
38 पञ्चाभ्रमौनिरवाते ॥ षण्मासे परिवर्जनमेव ॥ तत्तदर्धमलेष्वेषा तु एवं सर्वतैजसानामावर्तनं पुनःकरणं ॥ परिलेखनं तक्षणं ॥ कांस्यपि
त्तलयोः श्वकाकोच्छिष्टामृद्गंडूषस्पर्शे दशभिः भस्मभिः प्रक्षालनं ॥ अल्पकालोपहतौ भस्मना सलवणतैलोद्घर्षणाच्छुद्धिः ॥ बहुकाले त्वावर्तनं
त्रपुसीसापसानां भस्मजलाभ्यां शुद्धिः ॥ पसर्वतैजसानां त्वेलोहतौ गोमूत्रगोमयमृद्गंडूषाम्लोदकैः शुद्धिर्यथार्हाकार्या ॥ शुक्तिशंखपा
षाणमणिरत्नानामच्छानां विण्मूत्रादिचांडालाद्युच्छिष्टस्पर्शमात्रे जलप्रक्षालनाच्छुद्धिः ॥ घलेपानां भस्मजलाभ्यां मृज्जलाभ्यां शुद्धिः ॥ अ
त्यंतोपहतानां सप्ताहं भूमौ निखातप्रक्षालनाच्छुद्धिः सौवर्णरजतताम्रशंखशुक्तास्मस्फटिकादिरत्नेषु भेदेन दोषः ॥ शृंगदंतास्थि
मयानामल्पोपहतौ बिल्वफलचूर्णगौरसर्षपैर्मृद्गंडूषगोमयगोमूत्राणामन्यतरे प्रक्षालनाच्छुद्धिः ॥ अमुत्पातौ तत्क्षणं आमेध्यस्य
वेधे त्यागः ॥ दारुवेणुवेत्रपात्राणामल्पोपहतौ तक्षणं ॥ अतिदुष्टानां त्यागः ॥ कपित्थबिल्वालाबुनारिकेलफलानां तत्कृतपात्राणां
चाल्पोपहतौ मक्षाल्यगोपुच्छैर्निघर्षणेच्छुद्धिः ॥ मृन्मयपात्राणां त्वान्मीषदुष्टानां पुनर्दहनाच्छुद्धिः ॥ विण्मूत्रद्युपहतानां शवसूति स्मृ॰
कोदक्यादिस्पर्शानां त्यागएवमहाजलभाण्डे बुबाह्यादोषेन्तरंनदुष्यति ॥ तत्रबाह्यप्रक्षालनं ॥ कंकरककादिपदकाणां जलप्रक्षालना ३८

शुद्धिः॥सस्नेहानां पत्रिपानां मुस्जलप्रक्षालनाच्छुद्धिः॥सर्वपात्राणां संहतानां एकस्योपहतौ तस्यैव शुद्धिकार्या॥ततः स्थबानां॥कं
दमूलफलशाकानामपक्वानां वेणुवेत्रवल्काकाष्ठानां वाम्बुचित्स्पृष्टानां जलप्रक्षालनेनाच्छुद्धिः॥वस्त्राणामेकपुरुषोपभोग्याधिका
नां॥स्थूलानां वहनामन्येषामहतां च चांडालस्पृष्टानां महत्क्रीतानां प्रोक्षणाच्छुद्धिः॥स्वेतसूक्ष्मवस्त्रेषु पण्येषु नूतनेषु विक्रीतो बहुत्वं
चित्रवस्त्रे स्वेघ्वेकादशाङ्कबहुत्वं॥कुसुंभादिरक्तेषु त्रिषु बहुत्वं॥पण्येषु नूतनेषु च ततोऽन्यानामपि बहुत्वं॥सूत्रादिस्यूतेस्वल्पम
पि बहुत्वं॥तदन्यानां प्रक्षालनाच्छुद्धिः॥अधौतानां मलिनां च बहूनां च वैदिके कार्ये॥नवानां वाच्छिद्ररंगानां च प्रक्षालनं॥अविकं कं
बलस्याल्पदोषे सूर्यरश्मिभिः शुद्धिः॥विण्मूत्रादिदोषे वाल्मिकमृत्तिकाप्रक्षालनाच्छुद्धिः॥कौशेयवस्त्रस्याल्पदोषे प्रोक्षणाच्छुद्धिः॥वि
ण्मूत्राद्युपहतस्य तु मृज्जलप्रक्षालनाच्छुद्धिः॥क्षौमवस्त्रस्याल्पदोषे प्रोक्षणाच्छुद्धिः॥विण्मूत्राद्युपहतौ बिल्वचूर्णावघर्षणजलप्रक्षा
लनाच्छुद्धिः॥नीलोफलवस्त्रे स्वरूपेण च तु वर्णैः परित्याज्यं॥कंबले पटे च नीलीदोषो नास्ति॥नैपालकंबले अल्पहतोपहते प्रोक्षणं॥मू
त्रादिदोषे अरिष्टसंभवे फेनैर्विधव्यप्रक्षालनाच्छुद्धिः॥तूलशय्योपधानानां कुसुंभादिरंजितवस्त्राणां चाल्पोपहतौ आतपे किंचित्प्रोक्ष
णं॥विण्मूत्रादिसंस्पृष्टस्य सर्वांशं संशोधनाच्छुद्धिः॥ऊर्णाकार्पासितिलकुंकुमकर्पूरादिनिर्यासानां चैवं तेन वस्त्रा चांडालादिस्पृष्टं
प्रक्षालनाच्छुद्धिः॥तस्य पुरीषादिदोषे प्रक्षालनाच्छुद्धिः॥शयनासनपानसंबंधानां संहतानां बहूनां मवस्त्राणां च प्रोक्षणाच्छुद्धिःनै

स्म॰सा॰ लवच्च कर्मणा शुद्धिः॥ नवानां तु जंबद्धस्रादिति तत्तदश्चकापेषाणत्रिफलोदकेन वा गंधक्षपेच्छुद्धिः॥ धान्यभांडेषु बहिर्दोषेऽं
३९ तरं न द्रक्ष्यति॥ तत्र बाह्यं सम्यक्प्रक्षाल्यं धान्यमेकपुरुषोर्ध्वपभाण्डविकं चोडालादिस्पृष्टं प्रोक्षणाच्छुध्येत॥ एतत्पुरुषभाण्डप्र
३९ क्षालयेत्॥ शुद्धिः॥ धान्यमन्यश्चेश्वम्मतिकापुंजं तं उद्धीकरणाच्छुध्येत॥ धान्यराशौ मद्यादिमं लिप्तां त्रामपसार्य त्रिषष्ठमभ्युक्षणाच्छु
ध्येत॥ धान्यगृहे गृहदाहे तत्र पशुमरणे तद्धान्यं त्याज्यमेव॥ भूमिगर्भस्थं कुसुलस्थं च धान्यमभ्युक्षणाच्छुध्येत॥ मुद्गमाषादि
शिंबीधान्यानामल्पोपहतौ प्रोक्षणाच्छुद्धिः॥ धान्यमभ्युक्षं धूलीसंस्पृष्टं निष्कलीकरणाच्छुध्येत॥ अत्युपहतं त्याज्यमेव॥ द्रवधा
मेषु पुरुषभाराधिक्ये बहुत्वं तिथिलेषु द्रोणप्रमाणे बहुत्वं॥ तंडुलविदलादीनां तत्तद्द्वैबहुत्वं॥ तत्र स्पर्शादिदोषे प्रोक्षणं॥ सर्वत्र वि
ण्मूत्रादिदोषे तावन्मात्रं त्यक्त्वा शेषं प्रोक्ष्यं॥ शिथिलं तंडुलादि प्रोक्ष्यमेव॥ पुरुषाद्यन्नानां त्याज्यमेव॥ मद्यमांसचर्मकाष्ठादिकेन रभाण्ड
धिकमल्पोपहतौ वातातपाच्छुध्येत॥ नरभाण्डं मूलमात्रं प्रक्षालनाच्छुद्धिः॥ शुष्कं चेद्दृष्टमपि प्रोक्ष्यमेव॥ मद्याद्यैरत्युपहतं त्याज्यमे
व॥ पुस्तकं चांडालादीनिसंस्पृष्टं प्रोक्षयेत्॥ भूतलं केशकीटावेश्मलिनं मार्जनादभ्युक्षणाच्च शुध्येत॥ भूतलं स्वल्पे ष्ठविट्‌मूत्रादि
दिसेवितं गोक्रमणमार्जनादभ्युक्षणे शुध्येत् मूत्तलां विण्मूत्राद्यैरत्यंतोपहतं चेड्डलेखकनगोनिवाससंमार्जनप्रोक्षणैः शुध्येत् भूत स्म॰
लं नाति प्रस्रवद्दूषितं चंडालादीनिवासदूषितं चिरकालं विण्मूत्रादिदूषितं चरं कालः खरोष्ट्रादिदूषितं तच्छ्वानमृत्तिकामुद्धत्याम ३९

मृत्तिकामार्पणगवाक्रमणमार्जनप्रोक्षणैः शुध्येत् ॥ एतदेव भूतलमत्यंतोपहतं चेत् खननत्वात्पणाग्निनादधामृत्तिकापूरणगवाक्रम
मार्जनप्रोक्षणैः शुध्येत् ॥ गृहस्याशुचिलेपिकृकुड्यानां मृज्जलालेपनं भूमेः प्रक्षालनं च कार्यं ॥ भूतस्याचिरकालं विण्मूत्रादिवासितस्य
स्थानगत्वं गतस्यापि द्विः प्रक्षालनं तस्याः सर्पोक्तविधिना शुद्धिः ॥ अरण्ये क्षेत्रस्य स्थानत्वं गत विण्मूत्रादि चिरकालमत्यंतविदूषिते
रथ्ये हर्धे हलकर्षणा शुद्धिः ॥ गृहे विप्रक्षेत्रे विग्रामरणे तत्र हस्तं मृन्मं पंभांड पक्वं मन्नं सत्यजेत् ॥ मृत्तदेशं गोमयेनोपलिप्य जाप्रांते
गवाक्रांते ब्राह्मणपुण्याहवाचैर्वा कुशाक्षतवर्णाभिश्रोदकैः प्रोक्षणाच्छुद्धिः ॥ गृहे कश्चिद्व्रादिनिगडबंधनामृतश्चेत् भूमिं कुड्यं च प्रो
क्षालनाग्निनाश्रपदत्वा शूर्परश्मिप्रचार एह्याप्रयुक्तविधानाच्छुद्धिः ॥ जाते अग्नौ चाद्दूर्ध्वमध्ये भूमिमृत्तिकाप्रक्षेपात्पुण्याहवाच
नाच्छुद्धिः कार्या ॥ विप्रगृहे दग्धे तत्र हस्तं मार्जारे दौमृते सति तद्गृहस्य कर्षणाच्छुद्धिः ॥ श्वकाकादौ मृते चैवाकर्षणे विशेषः ॥ प्रति
मालोहजात्यौपहति दूषिकाताभस्मनोत्घर्षणात्पंचगव्येन शुध्येत् ॥ प्रतिमापाषाणोजा अत्योपहति दूषिता चेत् वल्मीकपा
जलैः प्रक्षालितानां पंचगव्येन शुध्येत् प्रतिमाताम्रकवर्णादिधातुजा विण्मूत्रग्रामरसादिदूषिता चेत् पंचगव्ये पंचपंहमधिवा
स्यात्तु स्पगोमूत्रे गोमये वाल्मीकमृत्तिकाभिः सम्यक् प्रोक्ष्याल्प पुनस्तिष्ठंमन शुध्येत् ॥ रत्नजातानां पंचगव्ये प्रक्षाल्य पुनः प्रक्षाल
नं कार्यं ॥ जले भूमि हस्तं गंधवर्णस्यान्वितं विण्मूत्रादिदूषितं त्रिगवांपानसमर्थं शुद्धं ॥ ततो ल्पं च पञ्चकाकाषाद्युपहृतं पेकगोपान

स्मृ॰ सा॰ समर्थे तथैव शुद्धं॥ जलं शुद्ध भांडाहृतं तत्र स्मिन्नेव दिने व शुद्धं॥ तेनाम दिने अंगुष्ठाननकार्पटः हृद्भांडगतं चतुर्द्रोणाधिकविण्मू
४० त्रादिदूषितं सकलं परित्यज्य भांडं प्रक्षाल्य कुत्राग्नौ घर्षणात्पुनः प्रक्षाल्य पंचगव्येन प्रोक्ष्य पुनर्जले प्रोक्षणाच्छुद्धिः॥ वापीकूपतडागा
दिस्थल्मजेलेषु मार्जारादिशावे क्लिन्नजीर्णे सति तज्जलं सर्वमुद्धत्य मृत्तिकां परितः क्षोभ्य पंचगव्यप्रक्षेपाच्छुद्धिः॥ पाषाणेरष्टिकाभि
र्वा बद्धे तत्स्थापनस्थाने दहनं॥ बासदारुबद्धे प्रक्षालनमेव॥ बहुजले षष्टिकुंभोद्धारः॥ मूषिकादिक्षुद्रप्राणिपाते त्रिंशत्कुंभोद्धा
रः॥ गोमूत्रादिप्रक्षेपश्च॥ जले जलप्राणिशावेन दोषः॥ वापीकूपजले नरशावे क्लिन्ने घटशतजलमुद्धृत्य पंचगव्यप्रक्षेपाच्छुद्धिः॥
पशुशावपाते ब्येषा शुद्धिः॥ तत्र जलेन मरणे जलस्यात्रिरात्रमाशौचं॥ अशौचान्ते पूर्वोक्ता शुद्धिः॥ कार्पो॥ वापीकूपजले ऽपानतुष्टे
ष्मविण्मूत्ररक्तवसामज्जाद्यैर्दूषिते षष्ठी कुंभजलोद्धारः शुद्धिः॥ जलबाहुल्योद्धात्तकुंभोद्धाराः पंचगव्यप्रोक्षणाच्छुद्धिः॥ कूपादिज
ले अस्पृश्यरजकादिदूषिते दिवा सूर्यरश्मिर्वा पुस्पर्शनाच्छुद्धिः॥ रात्रौ वा पुचंद्ररश्मिस्पर्शनाच्छुद्धिः॥ संध्यायां वा पुस्पर्शनाच्छुद्धिः
शुद्धिः॥ रात्रौ वा पुचंद्ररश्मिस्पर्शनाच्छुद्धिः॥ संध्यायां वा पुस्पर्शनाच्छुद्धिः॥ नदीस्रोतस्तटाकजले अत्यंतदूषिते तत्तीरकृतस्नानादनत्र
जलं शुद्धमेव॥ तृणं पाचितलमानं कुटपं प्रस्थमाढकं॥ द्रोणं चत्वारि काचेति पूर्वं पूर्वं चतुर्गुणं॥ द्रोणप्रमाणानि तथा न्यस्ये गंधा स्मृ॰
घ्रातेखरेन वा॥ शुना वा विटवराहग्रामकूटकाकैर्वा स्पृष्टे स्पृष्टमात्रमुद्धत्य शेषं मंत्रपूर्वमग्निं कृत्वा सहगायत्र्याभिमंत्रितैर्जलैः ४०

पवमानसुवर्चनइत्येतेनुवाकेनसहृदभिमंत्रितैर्वाशुद्धवतीऋभिर्वाशुचिलिंगैर्मंत्रैर्जलेरभ्युक्ष्यएतत्शुद्धमस्त्वितिविप्रव
चनलब्ध्वाशुध्येत्॥आजामुखेनवाघ्रातंशुध्येत्॥तदन्नेश्वकाकादिलालपाघर्षितेतावन्मात्रसमुद्धृत्यशेषंकनकवारिणाऽऽप्पवारि॥
णाभ्युक्ष्यउलमुकेनसंस्पर्शंकृत्वाअजकर्णेनवाकेनस्पर्शंशुध्येत्॥अन्नंपूर्वोक्तंविण्मूत्रंदुष्टंचदुष्टमात्रंमुद्धृत्यपवमानमंत्रितोदकेनाभ्यु
क्ष्यभस्मक्षिप्त्वाघृतेनाभिघार्यशुद्धमंत्रमस्त्वितिविप्रवचनात्शुध्येत्॥घृतस्यनवनीतस्यआढकप्रमाणस्यश्वकाकपिप्पलि
कादिदुष्टस्यदुष्टांशमुद्धृत्यवस्त्रेणपरिस्राव्याग्नौतज्जातीयेनतद्द्रव्यंप्रदहृत्वासर्वाग्नौप्रतापयगायत्र्याभिमंत्रिततज्जलाभ्युक्षणा
च्छुद्धिः॥तक्रतैलक्षीरदधिप्रभृतीनांद्रोणपरिमाणानांकाकाद्युपहतौघृतवच्छुद्धिः॥क्रतैलक्षीरदधिप्रभृतीनांद्रोणपरीमा
णानांकाकाद्युपहतौघृतवच्छुद्धिःतक्रदधिक्षीराणिशूद्रभांडस्थानिद्विजभांडेप्रक्षिप्तानिशुद्धानि॥नवनीतंघृतंक्षीरंशूद्रचंडालभांड
स्थंचेप्रतप्यनिजभांडेषुक्षिप्तंबहुशुध्येत्॥नवनीतंघृतंतैलंक्षीरंदासादिभांडस्थंगृहीत्वभांडेक्षिप्त्वाशुध्येत्॥नवनीतंघृतंचंडाले
नप्रमादेनस्पृष्टंजलेक्षिप्त्वाघृतंशुध्येत्॥द्रोणपरिमाणान्यूनप्रमाणधान्यनिर्मितान्नमाढकप्रमाणन्यूनघृतादीनांद्रोणपरिमा
णान्यूनतत्रादीनांचपूर्वोक्तोपहतौपरित्यागोनापदि॥आपदिपूर्वोक्तविधिनाशुद्धिः॥अतिस्वल्पमेचतुपुरुषाद्यनसमर्थमंजनेप्लावने
शुद्धिः॥अल्पानांत्यागः॥गुडलवणादीनापपर्यग्निकरणं॥भोजनेकृमिकीटादिदर्शनेतावन्मात्रमुद्धृत्यजलंभस्मम्न्दंवाक्षिप्त्वाशुध्येत्॥

स्मृ॰सा॰ मुखेहृष्टे निष्ठीव्य घ्रातं प्राश्य साश्रीपातः ।। पाकेकेशादिरच्छिन्नौस्यागः ।। तत्र भुक्तोपवसेपक्षस्य धर्मोपयोगीतदन्तं तत्प्रियं देशकालतोसंनड
४१ लभंतदुपहतं चेदल्पमपिपर्वोक्तविधिना शुध्येत् ।। अश्वमुखं मार्जारमुखं रतिकाले स्त्रीमुखं मलवर्णे वत्समुखं ।। फलपातने पक्षिमुखं
चरत्सापनद्रूखं च सदा शुद्धमेव ।। बालानाउपनयनाद्वर्वाक्शुद्धिः ।। स्त्री विवाहाद्वर्वाक्शुद्धिः ।। मूषकमशकपतंगमक्षिकाधान्यास्थधान्यकीट
गोहस्तिअश्वछागशुकाश्वजलस्वाचमर्वेजीवा स्वभावतः शुद्धाः ।। अशुद्धसंस्पर्शेपि चनदूष्यंति ।। चंद्रसूर्यरश्मिपवनाभावतः शुद्धाः ।। हतको
दकपामेध्यपतितास्तजस्यत्रानसंश्रयविनाअग्नेस्वभावतः शुद्धिः ।। रजोवांतोऽस्ततं शुद्धं हस्त्यश्वरथजातं वगवांपादरजस्यधान्यसमुत्थितं
रजश्व सम्मत्यं ।। अश्वविद्रूप हस्त्वेरोष्ट्रजाविककाकोलूककग्राम्यपक्षिवस्त्रमार्जनीसमुद्भूतं रजस्स्पृष्टं चेत् अश्रीकरमनापुष्कं अपुण्यं च ।। अज्ञा
तदोषपदार्थं तत्त्वतराव शुद्धं ।। संदिग्धदोषपदार्थं तद्दिमवाक्यैः शुद्धं ।। सूर्यस्पर्शेन मनापुष्पमापुंण्यं ।। वस्त्रकेशघटोदकं च नित्यं पशुपक्षि
धूलिवासितस्पर्शेन मनापुष्पमांपुंण्यं चेत्यादिसर्वमश्रीकरं चेमुखजाविप्रुषोमेध्या मस्स्पृष्टा चामबिंदवः ।। स्मश्रुवास्यगतेमेध्यं दंतस
मध्यवात्यजेत् ।। निगडेवास्यमाचमेदनुष्ठानेनचेनवा ।। तांबूलेतरस्थितेस्यक्तेनिगिर्णेवानुतिष्ठतः ।। नवामेनत्यजेद्दंतसक्तिकाद्विमद
र्शने ।। वस्तुवोपच्चतो मेध्याअमेध्यानरजपलाः ।। पंथानसविशुध्यंतिसोमसूर्याशुमारुतैः ।। मार्गकर्दमतोयानि स्पृष्टान्यस्पृश्यवा ए॰म॰
यसैः ।। माठतेनैवशुध्यंतिपक्वेष्टकचितानिच ।। पक्षाश्रुहंसं तताधाराशुद्धमेवमहज्जलं ।। वाकन्यक्रमनुणक्रमशांतंचसदाशुचिः ४१

इत्यादिसमस्तस्पर्शस्नाने द्रव्यशुद्धिः॥ अमेध्याक्तस्पृष्टौ पोर्गे चलेपापनोदाच्छुद्धिः॥ चंडालं पतितं चैव दूरतः परिवर्जयेत्॥ सूतकोदक्यां
चश्वाक्तपाविषेपेवर्जैव॥ असंकटस्थाने चंडालासूतिकोदक्यापतितानां क्रमाच्चतुस्त्रीद्व्येकयुगांतनिधाने सचैलस्नानं॥ संकटस्था
ने गोवालव्यजनादर्वाक् तत्स्पर्शेन सचैलं स्नानं कार्यं॥ श्वपाकादिच्छायारोहणे च तथैव चांडालसूतिकोदक्यापतितानां मत्या स्पर्शने सचै
लं स्नानं॥ अब्लिंगमंत्रगायत्रीवाश्वत्थं पादोनं अर्धपादं च क्रमाज्जपेत्॥ अत्र चस्नांतरसंसर्गः तांश्चात्स्पर्श एव॥ चांडालादिस्पृष्टस्प
ृष्टस्पृष्टिपादिस्पृष्टास्पृष्टस्पृष्टीपस्य सचैलं स्नानं॥ ततदर्धजपः॥ सर्वत्र मत्या स्पर्शने चतुर्थस्य स्नानमात्रं॥ चांडालसूतिकोदक्या
पतितानाममत्या स्पर्शने च सचैलं स्नानं चतुःपंचाश्वजपं तत्पादोनमर्धपादं च क्रमात् कुर्यात्॥ अमत्या चांडालादिस्पृष्टस्पर्शे सचैलं
स्नानं ततदर्धजपः कार्यः॥ सर्वत्र चतुर्थस्याचमनं॥ रजस्वलाविषये द्वितीयादिदिनेषु स्नानं पूर्वपादपादोनजपमाहुः॥ ततस्पृष्टस्पृष्टादिषु च
स्नात्वा ततदर्धजपः कार्यः॥ अचेतनेन दंडादीनां चंडालादिस्पर्शे तेस्नानमात्रं तृतीयस्याचमनं॥ द्रव्याणां प्रोक्षणं॥ मत्या रजकादिस्पर्श
ने स्नानमात्रं तृतीयस्याचमनं॥ द्रव्याणां प्रोक्षणं॥ मत्या रजकादिस्पर्शने सचैलं स्नानमेव ततः॥ स्पृष्टस्पृष्टदने स्नानमात्रं॥ तृतीयस्य ज्योतिर्द
र्शनं॥ मत्या पंचमजातिस्पर्शने सचैलं स्नानं॥ हीनस्य दूरस्पर्शने सचैलं स्नानं॥ सकृत्स्पृष्टस्पर्शने स्नानं आचमनं कार्यं॥ श्वशृगालवराहगर्दभवायसप्रेतधूम
देवद्रव्योपजीविविक्रीग्रामयाचसोमविक्रयीपूर्पर्चितकाष्ठस्त्रग्नानागवमध्यभांडक्रतोहमानुषास्थीनि दृष्ट्वा सचैलं स्नात्वा गायत्र्याष्ट

स्मृ॰हा॰ ग्रातं जस्वाघ्रतं प्राणपुनस्त्रिस्नात्वा त्रिरपो वामेत्॥ छ॥ अस्नेहे स्नानमात्रं॥ अमत्या स्नानमेव॥ सर्वत्र स्त्रीणां जपहोमस्थाने अम्बोदं स्नोदकुं
४२ भादिदानं कार्यं॥ वेदबाह्यस्य शवस्पर्शे पपश्रुपतं लौकापतिक नास्तिक विप्रकर्मस्थ द्विजां अस्पृश्य पतितं विसृष्टाग्निमभिशस्तं मठंश्चवदाह
कं शवं स्पृष्ट्वा सचैलं स्नायात्॥ अमत्या स्नानमात्रं कार्यं॥ अजीर्णे सुमेभ्यः दिते अस्तमिते विरके दुस्वप्ने दुर्जनस्पर्शे क्षुरकर्मणि भुक्तामहूर्तोर्ड
परिक्षुदिने च स्नानं॥ ऋतौ मैथुने स्नानं॥ अनृतौ च सम्यगाचमनं॥ दिवामैथुने अष्टम्यां चतुर्दश्यां पर्वणि मैथुने च सचैलं स्नात्वा स्मृतिप्रा
यश्चित्तं कार्यं॥ मूत्रपुरीषादौ शौचाचमनं कृत्वा पामहप्राबकुकालास्थितौ सचैलं स्नात्वा व्याहृतिहोमो जपो वा कार्यः॥ उदयास्तमयोरेतस्कं
दं पित्वा सचैलं स्नात्वा पुनर्नमइति जस्वा समस्तव्याहृतिभिराज्याहुतीर्जुहुयात्॥ जपे हा॥ अमत्या सचैलं स्नानमेव॥ अक्षिस्पंदने कर्णश्रो
त्रे सचैलं स्नानं॥ जपहोमाः कार्याः॥ श्वं जंबुकगर्दभादिक्रव्यादवायसैपश्वविट्सूकरमेषवानस्पर्शने नाभेरूर्ध्वं करौ मुक्त्वा स्नानं सचैलं॥ ना
भेरधस्पर्शने स्नानमात्रं॥ एतेश्चैवं नाभेरूर्ध्वं स्पर्शने स्नानमात्रं॥ नाभेरधस्पर्शने प्रक्षाल्य पुनराचम्य शुध्येत्॥ काकोलूकभासधककपोतग्रा
मकुक्कुटादिक्रव्यादपक्षिस्पर्शने नाभेरूर्ध्वं सचैलं स्नानं॥ नाभेरधस्पर्शने तु स्नानमात्रं॥ एतैश्चैवं नाभेरूर्ध्वं स्नानं॥ नाभेरधः प्रक्षालनं॥ अ
मेध्येषु तु सजीवपरकीयविण्मूत्ररेतोरक्तोत्तवास्थिमज्जवसादेर्मलैः स्पृष्टः पैश्च नाभेरधः प्रबाहुषु वस्त्रघामज्जलैर्गंधालेपं प्रक्षाल्य प्रस्ना राम॰
नं॥ नाभेरूर्ध्वं स्पर्शने स्नात्वोपवासः॥ इन्द्रियेषु छिद्रेषु स्पर्शने स्नात्वोपोष्य पंचगव्यं पिबेत्॥ स्वकीयमलस्पर्शने तु नाभेरूर्ध्वमपि प्रक्षाल ४२

नमेव॥ सलिले हि द्विजो ह्युच्छिष्टस्पर्शने विप्रस्सचैलं स्नानं॥ सलिले हि स्नानमात्रं॥ त्रिरात्रं तेनैवापस्पृगोप्यम्बुसंपर्कादप्सु शुध्येत्॥ अद्विजोच्छिष्ट सलिले हि त्रि
रात्रं॥ निस्सलिले हि स्नानमात्रं॥ अमानुषे तु मभक्ष्यवर्ज्यं पंचनखं रक्तावदंता ह्युच्छिष्ट सलिले हि स्नानं॥ वस्त्रांतरधारणे चेह पोसकर्मध्यामसंकारण्यमवेश्योजेष
पोक्तिलोमृत्तिकापादपोषट् क्षिस्वाप्रक्षालनं॥ वापुष्पुष्कोकर्दमादिन दोषः॥ श्वपाकादिच्छायारोहणे सचैलं स्नात्वाघृतं वाहिरण्योदकं कुंवा
गोदकं वापिबेत्॥ श्वपाकादिस्पर्शने स्नात्वाष्टसहस्रं जपः॥ मत्साचेदुपवासः॥ तत्पुत्र्यादिषुतारतम्येन योग्येन कल्प्यं॥ दिवा रजःस्नानादिके
मरणे चेत्तद्दिनादिकमशुचित्वं स्यात्॥ रात्रौ रजःस्नानादौ सति अर्धरात्रादर्वाक् पूर्वदिनमिसेक पक्षः॥ रात्रिं त्रिधा विभज्य पूर्वभागद्वये चेत्पूर्वदिनमिस
परपक्षः॥ एतेषां पक्षाणां मध्ये देशाचारेण व्यवस्था॥ अज्ञानतो रजस्वलादिकमशुचित्वं स्यात्॥ जननादौ तु ज्ञानादिकमशुचित्वं षट्स्मृतौ॥ सर्वथाअ
ज्ञातचेष्टुसित्वमेव॥ अतो ज्ञानादिकं रजस्वलायाःस्पृश्यात्वमेव॥ एवं सर्वत्वपापनिमित्तं स्वसुतादिपापादकं॥ सूतके तु ज्ञानादिकमेव॥ रज
स्वला त्रिरात्रमशुचित्वात्॥ चतुर्थेहनि स्नात्वा शुध्येत्॥ भर्तुस्पृश्या स्यात्॥ दैवपित्र्ये च कार्ये रजोनिवृत्तो शुध्येत्॥ सूतकाद्यशौचांते मलप्र
क्षाल्य दंतधावनं कृत्वा सचैलं स्नायात्॥ रजस्वला चतुर्थेह्नि षट्त्रिंशन्मृत्तिकाभिः शौचं कृत्वा वस्त्रादि स्त्री च पादं पादं सूनमृत्तिकाभिः विधवा
द्विगुणमृत्तिकाभिः शौचं कृत्वा मलं प्रक्षाल्य दंतधावनपूर्वं संगवे स्नायात्सचैलं॥ रजस्वलायाः स्नातायाः पुनरपि रजोदृष्टौ अष्टादशादिनाद
र्वाक अशुचित्वं नास्ति॥ अष्टादशदिने रजोदृष्टावेकरात्रमशुचित्वं॥ नवदशादिदिने द्विरात्रं॥ विंशादिदिने त्रिरात्रमेव॥ प्रायशो विंशतिदिना

स्मृ॰सा॰ ऊर्ध्वं रजस्वला विपी नामेवं भवति॥ विंशति दिनादर्वाक् प्रायश्चो रजोदर्शन वतीनामष्टादशादिने त्रिरात्रमशुचित्वं॥ किंच॥ त्रयोदशादिना
४२ दूर्ध्वं प्रायश्चो रजस्वला विपी नमेशा दिनादर्वागशुचित्वं नास्ति॥ एकादशादिने दिवा वेक रात्रमशुचित्वं॥ द्वादशेऽह्नि रात्रं॥ ७॥ त्रयोदशा
43 दिषु त्रिरात्रमेव॥ सचैलं स्नानमेव॥ वस्त्र प्रक्षाल्य स्नात्वा॥ पुनः सचैलं स्नानं॥ एकवस्त्र प्रच्छन्ने तथा स्नातो पितथैव स्नानमेव सचैलं॥
संग्रामे हट्टमार्गे च पात्रादेवगृहेषु च॥ अस्पृश्यतेमहापत्सु स्पृष्टा प्रच्छिन्न दुष्यति शाप्यकारि द्विपं स्पृष्टमस्पृष्टत्वं चिरं द्विपं॥ तपो श्चिविष
पं प्राकृतः स्पर्शास्पृष्ट विधानतः॥ ७॥ इत्यादि स्मृत्यर्थसारे स्पृष्टास्पृष्ट शुद्धिः समाप्तः॥ ॐ नमो भगवते वासुदेवाय॥ कामधेनु प्रदीपप्रश्लोक स्मृत्य
लतादिषु॥ शंभुद्रविड केतालो लल्लुता धेश्च भाषितं॥ मन्वात्रियाज्ञवल्क्यादिग्रंथात्प्रतिपादितं॥ स्मृत्यर्थसारं वक्ष्यामि सुखानुष्ठान सिद्धये॥ अ
थ शौचविधिः॥ चातुर्मासाभ्यंतरे गर्भमात्रनाशः स्रावउच्यते॥ तत्र स्रावे अवमासत्रये मातुः त्रिरात्रमाशौचं॥ सगोत्र पिंडानां स्नानमेव सद्यः शुद्धिः॥
यतः प्रभृति संतानविश्लेषः॥ सकूटस्थमारभ्य गणिताः सप्तपुरुषाः॥ सपिंडाः॥ ऊर्ध्वं समानोदकाः॥ पंचमषष्ठयोर्मासयोर्गर्भमात्रनाशः पात इत्यु
च्यते॥ पाते मातुर्गर्भमाससंख्यासमदिने माशौचं॥ सपिंडानां त्रिरात्रं॥ इदं गर्भनाशप्रसक्ताशौचं सर्ववर्णसमं॥ सप्तमासप्रभृति पूर्णगर्भ
निर्गमप्रसव इत्युच्यते॥ प्रसवे जनननिमित्तमाशौचं॥ पूर्णदशाहादिकं सपिंडानां सर्वेषां यथा वर्णं भवति॥ सोदकानां त्रिरात्रं॥ जनननि स्मृ॰
मित्तास्पृश्यत्वं मातुरेव॥ यावदाशौचं न पितुः॥ तस्य स्नानांतरमस्पृश्यत्वं नास्ति॥ सपिंडानां अस्पृश्यत्वं नास्ति॥ सूतकास्ववर्णाशौचेगतेप्य ४३

व्यवहारयोरेव॥अदृष्टार्थेषु कर्मसु पुत्रप्रसवविंशातिरात्रयोग्या॥स्त्री प्रसूतमासेन योग्या पुत्रजननदिवसे दानं कुर्यात्॥हिरण्याद्यभावे च दानं सं
कल्प्य पश्चात्समर्पयेत्॥प्रथमदिवसे हिरण्यादिदानं॥षष्ठे सप्तमे वा बलिदानं॥दशमदिने अन्नदानं॥दशमादि यथाचारं कार्यं॥सूतिकागृह
रक्षा च कार्या॥रात्रौ विशेषेण जन्माशौचमध्ये तस्य मरणे तु न्मते॥नाभिच्छेदनादूर्ध्वं शिशुमरणे निष्प्राणनिर्गमे वजनननिमित्त माशौचं कु
र्त्सयथावर्णं सर्वेषां सपिंडानामाद्यमेव॥मरणनिमित्तेन सद्यः शुद्धिः॥नाभिच्छेदनात्पूर्वं शिशुमरणे तु जनननिमित्ताशौचं सपिंडानां त्रिरात्रं
मरणनिमित्तेन सद्यः शुद्धिः॥नामकरणात्पूर्वं शिशुमरणे निखननमेव॥नानुगमनं नाप्युदकदानादिकं॥ज्ञातीनां सचैलं स्नानात्सद्यः शुद्धिः
ततो दंतजननात्पूर्वं शिशुमरणे निखननमेव॥तूष्णीं दहनोदकं वा कार्यं अनुगमनं कृताकृतं॥खननपक्षे सद्यः शुद्धिः॥दहने सकाहे॥
खननं च शवमलंकृत्य प्रक्षाल्य सद्यः तेनाभ्यंजनं स्नानवस्त्रगंधमाल्यानुलेपनैः ग्रात्स्यालंकृत्य ग्रामाद्बहिः शुचौ देशे कार्यं॥दहनं शावं तथा बाल
कृत्स्न बांधवा ज्येष्ठपूर्वा श्मशानं नीत्वा लौकिकाग्निना तूष्णीं कुर्युः॥तूष्णीमुदकदानं च॥दहने स्वमेधवांशल सूतिकापतितांचिताग्नीन्वर्ज
येत्॥दंतजननादूर्ध्वं त्रिवर्षपर्यंतमकृतचौलस्य मरणे खननं दहनं वा कार्यं॥खनने एकाहमाशौचं दहने त्रिरात्रं॥अत्रापि द्विवर्षांतमनु
गमनं कृताकृतं॥पश्चान्नित्यं दंतजनादूर्ध्वं त्रिवर्षपर्यंतं कृतचौलस्य मरणे तूष्णीं दहनं तूष्णीमुदकदानं॥त्रिरात्रमाशौचं नियतमेव का
र्यं॥त्रिवर्षात्परं कृतचौलस्यापि मरणे यावदुपनयनं तावदनुगमनं॥तूष्णीं दहनोदकादिदानं त्रिरात्रमाशौचं वा निनियतानि कार्याणि॥आन्

स्मृ॰ सा॰ पनीतमरणे मातापित्रोर्दशाहाशौचं पक्षिणी नादत्तः॥ अनुपनीतमरणाशौचे वर्णत्वाशौचत्रिभागादूर्ध्वं स्पृश्याः॥ अनुपनीतमरणे कृते अतीताशौ
४८ चं नास्ति॥ स्नानमेव॥ दृढं वपनप्रयुक्ताशौचं सर्ववर्णसमं॥ अशौचान्ते स्नात्वा स्वस्तिवाचनपूर्वं ब्राह्मणभोजयित्वा स्वस्तिवाचनं कार्यं॥ स्त्रीमरणे
44 तु पुरुषविषयज्ञातीनामापाचौलकरणादाचौलकालाद्वा स्नानशुद्धिः॥ स्त्रीपुरुषसापिंड्यं त्रिपुरुषमेवाप्रताकृत ततो वाग्दानादर्वागेकाहमा
शौचं॥ ततो विवाहादर्वाक् पतिपक्षे पितृपक्षे च त्रिपुरुषपर्यन्तं त्रिरात्रं॥ वाग्दानाभावे विवाहनिश्चयावधि एत्येके॥ पश्चाद्दहनं॥ पुरुषवद्वा
अस्पृश्यात्वादि सर्वं पूर्ववदेव॥ उपनयनादूर्ध्वं पुरुषमरणे विवाहादूर्ध्वं स्त्रीमरणे च विधिवत्सोदग्धा उदकपिंडदानसहितं॥ यथावर्णपू
र्णाशौचं कार्यं॥ तच्च दहनं ब्रह्मचारिदेहे लौकिकाग्निविधुरदेहे कपालाग्निना स्वगृह्योक्तविधिना कार्यं॥ गृहस्थस्य अनाहिताग्नेः गृह्याग्नि
ना कार्यं॥ आहिताग्नेस्त्रेताग्निभिर्दहनं॥ छ॥ तथाशौचं॥ ब्राह्मणानां दशाहं॥ क्षत्रियाणां द्वादशाहं॥ वैश्यानां पंचदशाहं॥ शूद्राणां मासं
द्विजत्रिशुश्रूषापंचमहायज्ञव्रतानां शूद्राणां पंचदशाहं॥ चतुर्थे दशम एकादशे द्वादशे पक्षे दूषिताः॥ पकाहस्वो हि मद्रसाधारणा नादृताः
॥ आशौचमाहिताग्नेः विधिवद्दहनं कृत्वा दहनदिवसे मारभ्यैव कार्यं॥ विदेशस्थे मृते यावद्विधिना न संस्कारस्तावत्पुत्रादीनां संध्यादिकर्म
लोपो नास्त्येव॥ अनाहिताग्नेर्विधिवद्दहनाभावे अशौचग्रहणं नास्त्येव॥ वपनं च पुत्राणां प्रथमेऽह्नि कार्यं॥ दशमे वा॥ श्राद्धादर्वाक् काश्चिदि स्मृ॰
ने वाग्न्या माह्नहि कार्यं॥ मृतस्यापनाभावे अस्थिसंस्कारं कुर्यात्॥ अस्थ्नामभावे कुशैर्वा शरीरप्रकृतिं कृत्वा पुनः संस्कारं कुर्यात्॥ आहिताग्नेः ४८

पुनःसंस्कारे प्रत्यक्षशववत् दाहादि पलाशवृंतकं पूर्णमाशौचं यथावर्णं कार्यं॥ आहिताग्नेः प्रत्यक्षशववत् दाहादिकं पूर्णमाशौचं यथा
वर्णं कार्यं॥ ॥अहिताग्नेः पुनःसंस्कारं तत्सूतकमध्ये चेत्सूतं तत्सूतकशेषेणेति शुद्धिः॥ अतीते सूतके पुनःसंस्कारे तु पुनः पूर्वं मुक्तगृही
ताशौचं स्यात् पुत्रस्य पत्न्याश्च दशाहादिकं पूर्ववर्णाशौचं॥ गृहीताशौचस्य पुत्रस्य पत्न्याश्च त्रिरात्रं॥ पत्नीपुनःसंस्कारे पत्युः पक्षश्चैवं॥ सपत्नो
मिथः श्चैवं॥ अगृहीताशौचानां सपिंडानां त्रिरात्रं॥ गृहीताशौचानां सपिंडानां पुनराशौचं नास्ति॥ विराजननमरणमेव॥ प्रथमदि
वसादूर्ध्वं शाते पुत्रादीनां स्वाशौच शेषेणैव शुद्धिः॥ हीनवर्णस्य ब्राह्मणपुत्रस्य द्विजातिसपिंडत्वे उत्कृष्टजात्याशौचमेव दासीदा
सस्य प्रेष्यस्य स्वामिकार्ये स्वाम्याशौचे समकागते स्वरूपाः॥ स्वकर्माधिकारस्त्वाशौचांत एवं॥ प्रतिशौचजानान्नाशौचं॥ तेषां मलप्र
क्षालनमेव॥ शावं दग्ध्वा स्पृष्ट्वा तोन वेक्ष्यमाणा आगच्छतो स्फुटितं श्लक्ष्णपाषाणं गृहीत्वा महाजलं गत्वा तत्र महाजले शरीरमज्जनं प्र
क्षाल्य वस्त्रं संधार्य स्वधा पुनः सचेलं स्नात्वा चैलवाग्यतः॥ समाहिताः सगोत्राः सपिंडाः समानोदकाश्च दृष्ट्वा पूर्वाः प्राचीनावीति दक्षि
णामुखाः प्रेतस्य नामगोत्रे उच्चार्य प्रेतत्र तृप्यत्विति जलपूर्णांजलिं दक्षिणोत्तरपाणिका पाषाणे सकृत्प्रसिंचेयुः॥ एवमुदकं कृत्वा जलात्समु
त्तीर्य नवजाततृणके भस्मदेशे उपविश्य कृत्स्नं पुत्रादीन् कुलवृद्धाः॥ पर्वैतिहासैः शोकोनिष्फलश्लेष्माश्रु बांधवैर्मुक्तं प्रेतास्ते पतितं
स्नानरोदनं कार्यं विहिताः क्रियाः कार्या इत्याश्वासयेयुः॥ एवमश्वासिता वस्त्राणि निष्पीड्य पश्चात् ... बालपूर्वं गृहं गत्वा द्वारस्थित्वा स

स्म॰सा॰ मा हिता निंबपत्राशनैर्भक्षइत्वा चम्पानिदकाग्नीमयेगोरसर्षपंदूर्वाकुरगोवृषभांस्पृष्ट्वा मपि प्रवालादिश्रुत्वस्नाणेवोक्ताश्च पथाव
४५ मंस्पृष्ट्वा अश्मनि पदन्यासनै निधाय गृहं प्रवेश्यः पुः॥एकन्नहनि एकस्मिन्नहनि एकस्मिंन्मृन्मये पात्रे जलं प्रेतात्र स्नाहीति आकाशे॥
45 त्रि क्षा दौस्थाप्यं॥निंबपत्रभक्षणं पात्रस्थापनं न वा कार्यं॥ ततस्तस्मिन्दिने तस्मिन्गृहेन न पचे पुः क्रितान्नेन वा अपान्विता हृतेन
वा अन्य गृहपक्वेन वा हविष्येण वर्तेरन्॥॥नस्वगृहपक्वेन॥ क्षारलवणमाषमांसमत्स्यएणापूपपाय सवर्जं॥ अधःशयनासना
बालवृद्धातुरवर्जं पथ्यकृपथ्यकं॥ ब्रह्मयपुत्राश्रम भवेपुः॥गुरोर्मृते उपवसेपुः॥पुत्राःपत्नीच॥जातस्तजके एते नियमानस्फः महागुरु
मरणे अक्षारलवणाशी नो द्वादशरात्रं दानाध्ययने वर्जयेत्॥पितापुत्रमुत्पाद्य संन्यासदार्थं ग्राहृहत्कि कास्य पितामहागुरुर्भवति
॥ततोपावदाशौचं तावसन्स्यहं एकैकमजिलंदद्युः॥तथा सतिदशादिनेपुदशांजल्यास्युः॥पद्धा अशौचदिने प्रति दिनं संख्यां
दृध्यांजलाञ्जती न दिनसंख्यया च तद्द्यात्॥तथ्या सति शतांजलयस्युः॥एवं माता महानामा चार्याणा चोदकदानं कुर्यात्॥अस्थि
संचयनमाहिताग्नेरनाहिताग्नेसंस्कारमारम्य प्रथमेन्हि द्वितीये त्रितीये चतुर्थे सप्तमे नवमे वा अरण्येस्वशाखोक्तविधिना
कार्यं॥तत्र पिंडत्रयं देवं॥एकपिंडश्मशानवासिम्पः॥पर्वंप्रेतेभ्यो मध्यमएकपिंडः॥ इदानीं तावत्प्रेताय दक्षिणतः एकपिंडः त एम॰
त्सविम्पइति॥दक्षिणसंस्कुं दद्यात्॥अस्थिनि गंगापां वा क्षिपेत्॥अनतीर्थे वा॥छ॥ शुभ प्रदेशे वा॥संचयने कृते वर्णाखाशौ ४५

दकालत्रिभागेन त्रिःपंचदशदिने स्पृश्याः ॥ दशाहाद्दशपेवद्दश विंशतिदिने भोज्यान्नाः ॥ ब्रह्मचारी मातापितृगुरूनाचार्योपाध्यायान् मतिरिक्ता
नां दहनाशौचोदकदानादिकं कुर्यात् ॥ असमावर्तनात् ॥ मात्रादीनां कुर्यादेव ॥ प्रक्रान्तप्रायश्चित्तव्रतश्चान्व्रतसमासे दहनादिकं नकु
र्यात् ॥ स्वकर्मरहितस्य कुर्यात् ॥ कृतेपि नोपतिष्ठते ॥ मातापितृगुर्वाचार्योपाध्यायानां प्रेतकार्ये व्रतचारिणां व्रतलोपो नास्ति ॥ स्मृत
कांतेनाश्रीपात् ॥ नस्मृतिकाभिः सहवसेत् ॥ अन्यप्रेतकर्मकरणे पुनरुपनयनं कार्यं ॥ समाप्तत्रिशिव्रतस्य दशाहाशौचं गुरुदहने ॥ स्व
कर्मपितामहापातकपतिता पुरुषाः स्त्रियाश्च हीनजातिगामिन्यो ब्राह्मणगर्भपातिन्यो भर्तृप्रश्वतेपत्स्वभावाविकर्माश्च क्लीबाघाश्च
दहनोदकं न कुर्युः ॥ होमात्कृते नोपतिष्ठति ॥ प्रेतस्य पुत्रो दिनत्रये ग्रामाद्बहिः पाषाणं स्वपुरतः कुशेषु मंत्रकं ॥ नामगोत्रेण पिंड
पितृपक्षप्रयोगे नत्रीन् पिंडान् दद्यात् ॥ पिंडे पाषाणे च अक्षतामाल्यधूपदीपान् दद्यात् ॥ धूपदीपौ न वा दद्यात् ॥ एवं दशदिनेषु पिं
डान् दद्यात् ॥ अशौचह्रासे पितरः पिंडान् दशैव वा ॥ अनेकपुत्रत्वे तदनुमतो ज्येष्ठ एव दद्यात् ॥ द्वयोपविभक्तेन वा ॥ अविभक्तेन वा ॥ पुत्राभा
वे पितृपिंडाः शिष्यास्तदर्थजीविनो वा संबधिनो बांधवा वा दद्युः असगोत्र सगोत्रा वा पुरुषो वा स्त्री वा प्रथमेन्हि दद्यात् ॥ दशाहांतरं स एव
॥ प्रथमेन्हि पद्व्यं दशाहांतं तेन देवा ॥ दशमेहेन्यधिकं पिंडत्रयं दद्यात् ॥ एकः पिंड स्नवत्सखिभ्यद्दानीतनप्रेतापमध्यमः दक्षिणपातः
एकपिंडोपमाप ॥ ततः कर्तापार्थितबांधवाः संबंधिनश्च तीर्थोदकांजलिं दद्युः ॥ न पाषाणनियमः ॥ ततः सुवासिनीभ्यो भंगलाताः

स्म॰सा॰ शुभशुक्लवाससः कलत्रपूर्वाः बालपूर्वाः स्वगृहं गत्वा अन्नभोजनादि स्वगृहपाकेन यथाचारं कुर्युः॥ त्रिरात्रमाशौचे चैव दशांजलयः
५६ दशांजलयो वा यद्दशांजलिपक्षे प्रथमेन्हि त्रयो जलयो द्वितीये चत्वारः तृतीये त्रयः अंतांजलिपक्षे प्रथमेन्हि त्रिंशत् द्वितीयेन्हि च
46 त्वारिंशत् तृतीयेन्हि त्रिंशत्॥ पिंडाश्च त्रयः दशपिंडो वा प्रथमेन्हि चत्वारः तृतीये त्रयः॥ संचयनं च द्वितीयेहि॥ अनुपनीतसपिंड
भस्मोदकात्॥ न बर्हिषी स्त्रीशूद्रयोः विवाहादर्वागेयं॥ अशौचदिनमध्ये पुनःसंस्कारे तु द्रव्यविभवपादिनसंभवे शौधं कालांतरकृ
सप्रेतकार्ये तु दिने शौधमेव॥ संवत्सरादूर्ध्वं प्रेतकार्ये उत्तरायणकालश्रेयात्॥ तत्रापि कृष्णपक्षश्रेयात्॥ तत्रापि नंदात्रयोदशीच
तुर्दशीदिनक्षपंच वर्जयेत्॥ शुक्रशनैश्चरौ वारौ वर्जौ॥ नक्षत्रेषु भरणीकृत्तिकाआर्द्राश्लेषामघामूलधनिष्ठादिपंचकं त्रिपुष्कराणि
चातिदुष्टानि सर्वथा वर्ज्यानि व्यतीपाते परिघे वैधृतौ च योगे विष्टिकरणे चतुर्थ्यां षष्ठ्यां द्वादश्यां ऋक्षे चंद्रे चातिदोषः रोहिणीमृगशीर्षपुन
र्वसुपूर्वोत्तराचित्राविशाखापूर्वाषाढोत्तराषाढानि हि पुष्कराणि ईषद्दुष्टानि संभवे वर्ज्यानि॥ शिष्टानि संभवे वर्ज्यानि॥ छ॥ शिष्टानि
ग्राह्याणि॥ सर्वथा न शुध्यसंभवे अनतिदुष्टवासनक्षत्रं ग्रा